No. ४२६ / घ

Title मृच्छकटिक प्रकरण व्याख्या सुवर्णालंकरणाख्या

Author लल्लादीक्षित:

Extent ४६ पत्र Age सं. १८७९

Subject नाटक

४३८
१०२

मृच्छकटिकप्रकरणव्याख्या
सुवर्णालंकाराख्या

५१६

416

मृच्छकटिकम्
प्रकरण व्याख्या
~~शुक्ली~~ सुवर्णालंकार

लक्ष्मीदीक्षितः

F. 46

forms 103 to 148

23.12.92



90-92

ष्यामि॥ अथवा कपटकार्पटिकः एष ब्राह्मणः वृद्धशृगालः कदापि अपवारितशरीरः गत्वा शृ
गालो भूत्वा॥ हृतभुक्तिं॥ विस्मृतिं॥ करोति॥ करिष्यतीत्यर्थः॥ तत एतस्य वचनानिमित्तं एवं ता
वत्करिष्यामि॥ वासु हे बाले वसंतसेने एहि॥ निर्वृत्तः॥ परमसुखी॥ शका॰ सुवर्णं ददामि
प्रियं वदामि पतामि शीर्षेण सवेष्टनेन॥ तथापि मां नेच्छसि शुद्धदंति किं सेवकं कष्टमयाः म
नुष्याः उपेंद्रवज्राछंदः॥ सवेष्टनेन॥ सोष्णीशेन॥ ३१॥ कमलं इत्यनेनाऽप्रस्तुतप्रशंसया चारुद
त्तः प्रतिपादितः अतएव चारुदत्ते एव सुचरितेत्यादि विशुद्धेत्यादि विशेषणान्वयः प्राधान्ये
न संगच्छते इति ध्येयं॥ ३२॥ वसं॰ कः अत्र संदेहः॥ खलचरितेति पुष्पिताग्राछंदः॥ खलचरिते

मृ॰टी॰ ८॰ अं॰॥ त्ति॰ निकृष्टेति च संबोधनद्वयं॥ परित्रोभसे इत्तिचिं॰ यत्नेनेत्यार्याछंदः॥३३॥ अपि च सहकारपाद
॥१०३॥ पं से विल्वानपलाऽशपादपं अंगीकरिष्यामि॥ शका॰ दास्याःपुत्रि॰ दरिद्रुचारुदत्तकः सहकार
103 पादपः कृतः अहं पुनः पलाऽशः भणितः॥ किंशुकोऽपि न कृतः॥ पलं॰ मांसं अश्नातीति पलाशो
राक्षस इत्यभिप्रायः॥ एवं॰ त्वं॰ मह्यं॰ गात्रींददती अद्यापि तमेव चारुदत्तकं॰ स्मरसि॥ वसं॰ हृद
यगतः एव॥ किमिति न स्मर्यते॥ शका॰ अद्यापि ते हृदयगतं॰ त्वां॰ सम॰ मेव॰ मोटयामि॥ ततः द
रिद्रसार्थवाहमनुष्यकामुकिनि॰ तिष्ठ रे॥ वसं॰ भण रे पुनरपि॰ श्लाघनीयानि एतानि अक्ष ॥राम॰॥
राणि॥ शकारः॥ परित्रायतां॰ दास्याःपुत्रः दरिद्रुचारुदत्तकः त्वां॥ वसं॰ परित्रायते॰ यदि॰ मां॰ ॥१०३॥

प्रेक्षन्ते॥ शका॰॥ किंसो इत्ति॥ शालिनीछंदः॥ किं स शक्रो बालिपुत्रो महेंद्रो रंभापुत्रः कालनेमिः सुबं
धुः॥ रुद्रो राजा द्रोणपुत्रो जटायुः चाणक्यो॥ वा धुंधुमारः त्रिशंकुः॥ ३४॥ अथवा एतेपि ते त्वां न
रक्षंति॥ चाणक्केणेत्यनुष्टुप्॥ चाणक्येन यथा सीता मारिता भारते युगे॥ एवं त्वां मोटयिष्या
मि जटायुरिव द्रौपदीं॥ ३५॥ वसं॰ हा मातः कुत्रासि हा आर्य चारुदत्त॥ एष जनः असंपूर्णम
नोरथः एव विपद्यते॥ तत् ऊर्ध्वं आक्रंदिष्यामि॥ अथवा वसंतसेना ऊर्ध्वं आक्रंदतीति लज्ज
नीयं खलु एतत्॥ नमः आर्यचारुदत्तस्य॥ शका॰ अद्यापि गर्भदासी तस्य एव पापस्य नाम गृ
ह्णाति॥ स्मर गर्भदासी स्मर॥ वसं॰ नमः आर्यचारुदत्तस्य॥ चतुर्थ्यर्थे षष्ठी॥ शका॰ मर गर्भदा

॥मृ·टी·८अं०॥ सी·मर॥शका·एदं इति शार्दूलविक्रीडितं छंदः॥एतां·दोषकरंडिकां·अविनयस्याऽऽवासभूतां
॥१०६॥ खलांरक्षां·तस्य·किलाऽऽगतस्य·मेरे णे·कालाऽऽगतां आगतां॥किं·एष·समुदाहरामि·निजकंबा
104 व्हो·श्वशुरत्वं·निःश्वासा·पिम्रियते·अंबा·सुसुता·सीता·यथा·भारते॥३६॥रमणे·रमणनिमित्तं॥
निमित्तात्कर्मयोगे इति सूत्रेण सप्तमी॥इच्छंतं इति॥इदमेवछंदः॥इच्छंतं·मा·नेच्छसीति·ग
णिका·रोषेण·मेमारिता·शून्ये·पुष्पकरंडके इति सहसापाशेन·उद्वासिता॥सेवा वंचितभ्रा
तृका·मम·पिता·मातेव·सा·द्रौपदी·यस्याः पश्यति·नेदृशं·व्यवसितं·पुत्रस्यश्वशुरत्वं॥३७॥भव ॥राम॥
तु·सांप्रतं·वृद्धशृगालः आगमिष्यतीति॥ता॥ततः अपसृत्य·तिष्ठामि॥काणेली॥कन्यका॥त ॥१०६॥

स्याः मातरं॥ वेश्यानां कन्योत्पत्तावेवाऽऽनंददर्शनात्कन्यामातृत्वेन व्यवहारः॥ तथाचात्र स
र्वत्र काणेलीमातृपदं व्याख्यातं॥ काणेलीमाता वेश्या इति ध्येयं॥ शका० भाव स्वागतं ते पुत्र
क स्थावरक चेट तवापि स्वागतं॥ चे० अथ किं॥ शका० कीदृशः न्यासः॥ श० गता॥ श० भावस्य ए
व पृष्ठतः॥ श० त्वं कतमया दिशा गतः॥ श० सापि दक्षिणया गता॥ श० सापि उत्तरया॥ श० शपा
मि भावस्य शीर्षं आत्मनः कृत्ताभ्यां आत्मीयाभ्यां इति वा॥ पादाभ्यां॥ ततः संस्थापय हृदयं
एषा मया मारिता॥ शका० यदि मम वचनेन प्रत्ययसे तत्त्पश्य प्रथमं राष्ट्रियश्यालसं
स्थानस्य शूरत्वं॥ श० ही ही॥ खेदे॥ उपरतः भावः॥ चेटः॥ समाश्वसितु भावः॥ अविचारितं प्र

वहणं आनयता॰ एवमया॰ प्रथमं॰ मारिता॥ दाक्षिण्यादकेति॥ विपणिः आपणः॥ बाजार॰ हा
ट॰ इति भाषा॥ सौभाग्यं॰ सौंदर्यं॰ सुदैवं॰ विलासादीनाऽमद्भुतत्वं च॰ तदेव॰ पण्यं॰ विक्रेयवस्तु जा
तं॰ तस्य आकरः॰ खनि॰ हत्पत्तिभूमि॰ रित्यर्थः॥ अत्र रसः करुणः॥ ३०॥ किंतु नामेत्यनुष्टुप्॥ श
॥ शकाः॰ अरे॰ वसंतसेनां स्वयमेव मारयित्वा॰ मां॰ दूषयित्वा॰ कुत्र॰ पलायसे॰ सांप्रतं॰ ईदृशः
अहं॰ अनाथः॰ प्राप्तः॥ अपध्वस्तः॰ लोकद्वयभ्रष्टः॥ शकाः॰ अत्यंइ तीद्रवज्राछंदः॥ अर्थं॰ शतं द
दामि॰ सुवर्णं ते॥ कहावणं॥ अंगरक्षादिवस्त्रं॥ किंचिदन्यद्वा वस्तु॥ ददामि॥ सवेष्टिकं॥ वेष्टिका ॥राम॥
उष्णीशं॥ कटिबंधनं वा॥ ते॥ एषदुःशब्दानां॰ फलक्रमो मे सामान्यको भवतु॰ मनुष्यकानां॥ ३१॰ ॥१०५॥

चे॰ शांतं पापं प्रतिहतममंगलं॥ अप्रीतिरित्ति॥ प्रहर्षिणी॰ छंदः॰ परिभवः॥ निंदा॥ गुणाः॥ मौर्वी
प्रसिद्धाः प्राणीनां रमणीयाः धर्मविशेषाश्च॥ ४४॥ शका॰ भाव प्रसीद श॥ एहि॰ नलिन्यां॰ सरस्यां॥
प्रविश्य॰ क्रीडावः॥ अपतितमित्ति॥ अपतितमपिमां पतितं॰ भवंतं॰ सेवमानं॥ जनः पतितमि
व॰ मां॰ मनार्यं॰ मन्यते इत्यन्वयः॥ नगरस्त्रीभिः॰ शंकितेः॰ रूढोऽक्षिभि दृष्टं त्वां इत्यर्थः॥ मालिनी
छंदः॥ ४५॥ अन्येत्यनुष्टुप्॥ कस्यांचिदपि जातौ त्वं॰ वेश्यामाभूः॥ किं त्वीदृशे कुले जाये थाः॥
वेश्यात्वा देवविपत्तिरियमापतिता॥ नेदृशी तु कुलीनानामंगनानामिति भावः॥ ४६॥ शका॰
मदीय पुष्पकरंडकजीर्णोद्याने॰ वसंतसेनां॰ मारयित्वा॰ कुत्र पलायसे॰ एहि॰ मम॰ आवुत्तस्य

॥ मृ० टी० ८ अं० ॥ अधिकारिणः इत्यर्थः अयतोव्यवहारं देहि ॥ जाल्मः ॥ असमीक्ष्यकारी ॥ शका० किं रे भीतोऽसि
॥ १०६ ॥ तदा गच्छ ॥ शका० निधनं गच्छ ॥ अरे स्थावरक पुत्रक कीदृशं मया कृतं ॥ चेटः ॥ भट्टक मह
106 त् अकार्यं कृतं ॥ शका० अरे चेट किं भणसि अकार्यं कृतं इति ॥ भवतु एवं तावत् ॥ गृहाण
एतं अलंकारं मया तावत् दत्तं यावत्यां वेलायां अलंकरोमि तावतीं वेलां ॥ त्वमात्मानमलं
कुरु इति शेषः ॥ मम आज्ञा तव ॥ चेटः ॥ भट्टके एव एते शोभंते किं मम एतैः ॥ शका० तत् ग
च्छ एतान् वृषभान् गृहीत्वा मदीयायां प्रासादबालाग्रप्रतोलिकायां तिष्ठ यावत् अहं ॥ राम ॥
आगच्छामि ॥ चेटः ॥ यत् भट्टकः आज्ञापयति ॥ शका० आत्मपरित्राणे आत्मपरित्राणानि ॥ १०६ ॥

मित्रं॥ आत्मरक्षार्थं इत्यर्थः॥ भावः गतः अदर्शनं॥ ऽरिवटः स्वव धऽभिया पुनर्नेऽस्रोचन पथमागमिष्यती-
त्यर्थः॥ चेटमपि प्रासादबालाग्रप्रतोलिकायां निगडपूरितं कृत्वा स्थापयिष्यामि॥ एवं मंत्रो रक्षितो
भवति॥ ततः गच्छामि॥ अथवा पश्यामि तावत् एतां किं एषा मृता अथवा पुनरपि मारयिष्यामि
॥ कथं सुसुप्ता॥ भवतु॥ एतेन प्रावारकेण प्रच्छादयामि एनां॥ अथवा नामांकितः एष॥ ततः कोऽ-
पि आर्यपुरुषः प्रत्यभिज्ञास्यति॥ भवतु एतेन वातालीतो॥ पुंजितेन शुष्कपर्णपुटेन॥ प्रच्छादया-
मि॥ भवतु एवं तावत् सांप्रतं अधिकरणं गत्वा व्यवहारं लेखयामि॥ यथा अर्थस्य कारणा-
य सार्थवाहचारुदत्तकेन मदीयं पुष्पकरंडकं॥ जीर्णोद्यानं प्रवेश्य वसंतसेना व्यापादि-

॥ मृ·टी·ए·अं·॥ तेति॥ चारुदत्तेत्यनुष्टुप्॥ चारुदत्तविनाशायकरोमिकपटंनवं॥ नगर्यां विशुद्धायांपशुघातमि
॥१०७॥ वृदारुणां॥ ६६॥ भवतु·गच्छामि॥ अविद॥ मादिकं इदमातिखेदार्थकं॥ येनयेन गच्छामिमार्गेण
107 तेनैव·एषदुष्टश्रमणकः गृहीतकषायोदकंचीवरंगृहीत्वाआगच्छति॥ एषमया·नसि·छित्वा
वाहितःकृत्तवैरः॥ कदापि·मांप्रेक्ष्य·एतेन·मारितेति·प्रकाशयिष्यति॥ ततकथंगच्छामि·भव
तु·एतां॥ अर्द्धपतितंप्राकारखंडंउल्लंघ्य·गच्छामि॥ एशेलंघीत्यायीछंदः॥ अलंघीत्यहमर्थकमर
व्ययं॥ तुलाहीतित्वरितंइत्यर्थः॥ एषोऽहंत्वरितंतुलितःलंकानगर्योगगनेगच्छन्॥ भूम्यांपाता ॥राम॥
ले·हनूमच्छिखरेइवमहेंद्रः॥ ६७॥ महेंद्रशिखरादिवहनूमानितिवक्तव्येशकारोक्तयावि ॥१०७॥

परीतमित्यसकृदावेदितं॥ पटाक्षेपेणेति॥ नेपथ्यपटमुद्घाट्यप्रविष्टइत्यर्थः॥ यस्तावदेव
मेवागतः पात्रविशेषः सोऽपटाक्षेपेणेति नाटके संकेतः॥ एवमेवेदमिह पूर्वोऽपरत्रबोध्यं
भिक्षुः॥ प्रक्षालितं एतत् मया चीवरखंडं किं नु खलु शाखायां शुकुवावइश्शं॥ शुष्कं करि
ष्यामीत्यर्थः॥ इह वानरैः विलुंपंति॥ किं नु खलु भूम्यां॥ धूलीदोषो भवति॥ तत् कुत्र प्रसा
र्य शुष्कं करिष्यामि॥ भवतु॥ इह वाताऽऽलीपुंजितेशुष्कपत्रसंचये प्रसारयिष्यामि॥ नमो बु
द्धस्य॥ बुद्धायेत्यर्थः॥ भवतु घर्माक्षराणि उदाहरामि॥ पंच जनाः येन मारिताः इत्यादि अं
कादावुक्तं श्लोकद्वयं पठतीत्यर्थः॥ व्याख्यातं॥ अथवा अलं मम एतेन स्वर्गेण मोक्षेणेत्यर्थः

॥मृ॰टी॰८अं॰॥ यावत् तस्याः॥ वसंतसेनायाः इत्यर्थः॥ बुद्धोपासिकायाः प्रत्युपकारं न करोमि॥ ययाशैर्देनां

॥१०८॥ सुवर्णकाणां कृते द्यूतकराभ्यां निष्क्रीतः॥ ततः प्रभृति तया क्रीतं इव आत्मानं अवगच्छामि

किं नु खलु पर्णोदरे समुच्छ्वसिति॥ अथवा॥ वादाद वेणोत्यार्याछंदः॥ वाताऽऽतपेन तप्तानि॰

चीवरतोयेन आर्द्राणि पत्राणि॥ एतानि विस्तीर्ण पत्राः॥ प्रसारित पक्षाः॥ मन्ये पत्राः॥ पक्षि

णः॥ इव स्फुरंति॥ छेद॥ संज्ञां॥ चेतनां॥ भिक्षुः॥ शुद्धाऽलंकारभूषितः स्त्रीहस्तो निष्क्रामति॥ क

थं द्वितीयोपि हस्तः॥ प्रत्यभिजानामि इव एतं हस्तं॥ अथवा किं विचारेण सत्यं स एव ह ॥रामः॥

स्तः येन मे अभयं दत्तं॥ भवतु पश्यामि॥ सा एव बुद्धोपासिका॥ भिक्षुः कथं उदकं याचते ॥१०८॥

दूरे व दीर्घिका किमिदानीमत्र करिष्यामि ॥ भवतु एतत् चीवरं अस्याः उपरि गालयिष्यामि ॥ वसं:
आर्यकः त्वं ॥ भिक्षुः ॥ किं मां न स्मरति बुद्धोपासिका दशसुवर्णनिष्क्रीतं ॥ वसं: स्मरामि ॥ न पुनर्यथा आर्य:
भणति ॥ कवलं त्वां स्मरामि दशसुवर्णनिष्क्रीतत्वेन न स्मरामि।ति महत्तां महानुभावतेति वोध्यं:
परं अहं उपरता एव ॥ भिक्षुः ॥ बुद्धोपासिके किं नेदं ॥ वसं: यत् सदृशे वेशभावस्य ॥ भिक्षुः ॥ उत्ति
ष्ठतु बुद्धोपासिका ॥ एतां पादपसमीपजातां लतां अवलंब्य ॥ संन्यासिना न कस्यापि स्पर्शः का
र्यः किं वाच्यं ॥ तत्र स्त्रीणां स्पर्शे तत्रापि तरुण्याः इति शास्त्रं ॥ भिक्षुः ॥ एतस्मिन् विहारे मम धर्मभ
गिनी तिष्ठति तत्र समाश्वस्तमनाः भूत्वा उपासिका गेहं गमिष्यति ॥ विहारो नास्ति कानां देवा

॥मृ·टी·अं॥ लयंइतिस्फुटं॥ ता॥ततः॥ शेरणं२शनैः२गच्छतु·वृद्धोपासिका॥ अपसरतआर्याः अपसरत॥ रपा·
॥१०८॥ तरुणी·स्त्री·एषभिक्षुरिति॥ सुष्ठुः मम एष धर्मः॥ हस्तसंयतमुखसंयतेंद्रियसंयतःसखलु॥ मनुष्यः
109 किंकरोति॥ तस्य·राजकुलंपरलोकःहस्ते·निश्चलः॥ योधर्मात्मातस्यनकापिभीरित्यर्थः॥ ॥ ॥ ॥
॥ॐ॥॥इतिश्रीमन्मृच्छकटिकप्रकरणव्याख्यायांलल्लादीक्षितसंख्यावतामहत्यानिरालंब
नयाभावनया·निर्मितायांवसंतसेनामोटनोनामअष्टमांकः॥ ०॥ संपूर्णत्तामफाणीत॥ ॥
श्रीः·शोधनकः॥ आज्ञप्तोऽस्मि॥ अधिकरणभोजकैः॥ अधिकरणं·राज्यनिदानं·न्यायविवादस्थलं ॥राम॥
प्रसिद्धं·यावन्यामिदानींराज्यसृष्टोअदालतइतियदुच्यतेतत॥ तस्य·भोजकाः·प्रभवंतैरित्य ॥१०८॥

र्थः।। आज्ञामेवाह अरे· शोधनक·व्यवहारमंडपं·गत्वा·आसनानि·सज्जीकुरु·इत्ति।। ततः·यावत्·अ
धिकरणमंडपं·सज्जितुं·गच्छामि।। एष।। अधिकरणमंडपः।। एष प्रविशामि।। विविक्तः।। पूतः स्व
च्छः·इत्यर्थः।। कारितः·मया·अधिकरणमंडपः·विरचितानि·मया·आसनानि·ततः·यावत्·अधि
करणिकानां·पुनर्निवेदयामि।। कथं·एष राष्ट्रियश्यालः·दुष्टदुर्जन मनुष्यः·इतः·एव·आगच्छ
त्ति·ततः·दृष्टिपथं·परिहृत्य·गमिष्यामि।। शकारः।। एहादेहं इत्ति।। प्रहर्षिणीछंदः।। स्नातोऽहं स
लिलजलैः पानीयैः।। उद्यानेउपवनकानने·निषण्णः।। नारीभिः सह युवतीभिः स्त्रीभिः·गंधर्वैः सुवि
हितैः·अंगकैः।। श।। खणेण गंठी इत्ति।। उपेंद्रवज्राछंदः।। क्षणेन·ग्रंथिः·क्षणं·जूटको·मे·क्षणेन·

ग्रंथिः क्षणे· जूटको· मे· क्षणेन· मे· चंचलकुंतलाः· वा॥ क्षणेन मुक्ताः क्षणे· मूर्ध्वचूडाः न्वित्रो विचित्रः अ
हं॥ राजश्यालः॥ रा॥ राजश्यालत्वेन मयि सर्वं· संभाव्यते इति भावः॥ ह गे इत्येकारो लघुः पठनीयः॥
एहिं इत्यनुस्वारस्य लघुत्वं च तत्र तत्र बोध्यं॥ अपि च॥ विषग्रंथिगर्भप्रविष्टेन इव कीटकेन· अंत
रं· मार्गमाणेन· प्राप्तं· मया· मह· दंतरं॥ ततः कस्य· उपरीति शेषः॥ एतत्· कृपणचेष्टितं पातयि
ष्यामि एतत्॥ वसंतसेनामारणरूपं॥ कृपणं· दीनं· सुशकं इत्यर्थः॥ कृपणं च तत् चेष्टितं चेति
कर्मधारयः॥ आं· स्मृतं· मया· दरिद्रचारुदत्तस्य· संभाव्यते॥ भवतु॥ अधिकरणमंडपं· गत्वा· अ
ग्रतो व्यवहारं· लेखयिष्यामि॥ यथा· चारुदत्तकेन· वसंतसेनिका· मोटयित्वा· मारिता॥ ततः·

यावत् अधिकरणमंडपं एव गच्छामि ॥ एतत् तत् अधिकरणमंडपं अत्र प्रविशामि ॥ कथं आस
नानि दत्तानि तिष्ठंति तावत् आगच्छंति अधिकरणभोजकाः ॥ एतस्मिन् दूर्वाचत्वरे मुहूर्त्तं
उपविश्य प्रतिपालयिष्यामि ॥ प्रतिपालनं मार्गप्रतीक्षा ॥ शोधः एते अधिकरणिकाः आगं
छंति तत् याव दुपसर्पामि ॥ श्रेष्ठी वणीक् ॥ सेठ इतिभाषापि ॥ कायस्थः ॥ प्रसिद्धः ॥ सर्वमि
दं स्पष्टं मिताक्षरायां ॥ तौ ॥ श्रेष्ठिकायस्थौ ॥ आज्ञापयतु आर्यः ॥ अधिकरणिकः ॥ व्यवहार
पराधीनतया ॥ व्यवहारस्य पराधीनतया परस्य अधीनतया ॥ तन्मात्रप्रयोज्यत्वेन ॥ पर
स्य अन्यस्य अन्यत् ॥ स्मृतिशास्त्रं कामंदकादिनीतिशास्त्रं बुद्धिश्च निसर्गपद्धती ॥ सत्याऽस

॥मृ॰टी॰द॰अं॰॥ त्यपराभिप्रायज्ञानं दुष्करं अधिकरणिकैरित्यर्थः॥ इदमेवाह श्लोकत्रयेण॥ छन्नं इति॥ इदं श्लो
॥११२॥ कद्वयं किंचिद्विशेषं वहद् एकार्थमेव॥ छन्नं॥ सत्यं कार्ये ऽमसत्येन आच्छादितः ऽमसत्यं सत्येन
छन्नमित्यर्थः॥ न्यायः॥ दिव्यप्रमाणादिमाननिर्णयः॥ प्रमाणं वाचनिकं चाक्षुषं पत्रलेखादि
वा॥ एतदभावे दिव्यमवतरतीति ध्येयं॥ अधिकरणे स्थान्दोषान् पुरुषाः न कथयंति॥ यतः
स्वयं रागलोभाभिभूताः॥ तैराद्दरैः पुंभिः पक्षाऽपरपक्षाभ्यां वर्द्धितानि बलानि सामर्थ्यानि
येषां तैः दोषैरित्यर्थः॥ पक्षः॥ स्वीयत्वाभिमानवान्॥ अपरपक्षः स्वीयत्वाभिमानशून्यः॥ द्रष्टुः ॥राम॰॥
प्राड्विवाकस्य॥ स्पष्टं शिष्टं विदुषां॥ ३॥ छन्नं कार्यं प्रतिपाद्य छन्नं दोषं प्रतिपादयन्ति॥ छन्नं दो ॥१११॥

षमित्ति॥ संतोपि साधवः सदाचाराः अपि॥ येरागादिना पक्षाऽपरपक्षौ येदोषैः सहिताः पापानि सं
कुर्वंते ते ध्रुवं नष्टाः इत्यर्थः॥ स्पष्टऽमवशिष्टं शिष्टानां॥ ४॥ इदानीन्यायद्रष्टर्लक्षणमाह॥ यतः इ
त्यादिना॥ आधिकरणं उक्तं तत प्रयोजनं अस्येति अधिकरणिकः॥ प्राड्विवाकः प्रयोजनमि
तिठक्॥ अधिकरणंअस्याऽस्तीत्यधिकरणिकः॥ अतनिठनाविति ठन् वा॥ स्फुटमिदंमिता॥
क्षराादिषु॥ शास्त्रज्ञ इति॥ क्लीबान् असमर्थवान्॥ धर्म्यः॥ धर्मोऽनपेतः॥ द्वार्मावे॥ ५॥ श्रेष्ठिका
यस्थौ॥ आर्यस्यापिनाम गुणेदोष इति उच्यते॥ यदि एवंतदाचंद्रोऽऽलोकेपि अंधकार इति
उच्यते॥ शोध॰ एतु२ अधिकरणभोजकः एतु॥ शो॰ अयमधिकरणमंडपः॥ ततप्रविशंतुअ

॥मृ·टी·९·अ·॥ धिकरणभोजकाः॥ शोध· यत्तु·आर्य·आज्ञापयति॥ आर्याः अधिकरणिकाः भणंति कः क इह·कार्या
॥११२॥ ऽर्थी·ति॥ शका·उपस्थिताः अधिकरणिकाः॥ अहंवरपुरुषमनुष्यः वासुदेवः राष्ट्रियश्यालः राज्ञः
श्यालः कार्याऽर्थी॥ शो· ससंभ्रमं सभयं इत्यर्थः॥ ही·मादिके॥ खेदे॥ प्रथममेव राष्ट्रियश्यालः कार्या
र्थी॥ भवतु·आर्य·मुहूर्त्तं·तिष्ठ· तावत् अधिकरणिकानां निवेदयामि॥ आर्याः एष खलु राष्ट्रियश्या
लः कार्यार्थी·व्यवहारमुपस्थितः॥ उपरागः॥ ग्रहणं॥ व्याकुलेन निबिडेन॥ शोध· यत्तु आर्यः आ
ज्ञापयति इति॥ आर्य·अधिकरणिकाः भणंति॥ अद्य गच्छ न·दृश्यते·तव·व्यवहारः॥ शका·किं ॥राम·॥
न·दृश्यते·मम·व्यवहारः यदि न·दृश्यते·तदा·आवुत्तं भगिनीधवं इत्यर्थः॥ राजानं पालकं॥ ॥११२॥

भगिनीपतिं विज्ञाप्य॥ भगिनीमातरं च विज्ञाप्य एतं अधिकरणिकं फेलिअ प्रक्षिप्य अत्र अन्यं
अधिकरणिकं स्थापयिष्यामि॥ शोधः आर्य राष्ट्रियश्याल मुहूर्त्तं तिष्ठ तावत् अधिकरणिका
नां निवेदयामि॥ एष राष्ट्रियश्यालः कुपितो भणति॥ शोधः आर्य अधिकरणिकाः भणंति आग
च्छ दृश्यते तव व्यवहारः॥ ततः प्रविशतु आर्य॥ शकाः ही॥ वितर्के॥ प्रथमं भणति न दृश्यते॥
सांप्रतं दृश्यते इति ततः नाम भीतभीताः अधिकरणभोजकाः॥ यावद् अहं भणिष्यामि तावत्
प्रत्येष्यंते॥ भवतु प्रविशामि॥ सुसुखं अस्माकं॥ युष्माकं अपि॥ सुखं ददामि न ददामि च॥ शकाः
आं आत्मीया मम भूमिः ततः यत्र मे मह्यं रोचते तत्र उपविशामि॥ एष उपविशामि॥ ननु अत्र

॥मृ॰ टी॰ अ॰॥ उपविशामि॥ एषउपविशामि॥ श॰ अथ किं॥ श॰ कर्णे॰ कार्यं॰ कथयिष्यामि॥ एतावद्दुके॰ मल्लक
॥११३॥ प्रमाणस्य॰ कुले॰ अहं जातः॥ ला॰ अशास्तुले इत्यार्या॰ छंदः राजश्वशुरो॰ मम॰ पिता॥ राजा॰ तातस्य
113 भवति॰ जामाता॥ राजश्यालः अहं॰ ममापि॰ भगिनीपती॥ राजा॥ इ॥ एतेन यदुक्तं भवतितदाह
अपराद्धस्यापीत्यादि॥ शका॰॥ एवं॰ भणामि॥ अपराद्धस्यामि॰ न॰ च॰ मे॰ किमणिकरिष्यंति॥ ततः
तदा॰ इत्तिवा॰ तेनभगिनीपतीना॰ परितुष्टेन॰ मे॰ क्रीडितुं॰ रक्षितुं॰ सर्वोद्यानानां प्रवरं॰ पुष्प
करंडकजीर्णोद्यानं दत्तं॰ जीर्णेति॥ विशेषणं विजनत्वज्ञापनार्थं॥ तत्र॰ च॰ प्रेक्षितुं॰ अनु ॥राम॰॥
दिवसं॰ शुष्कंकारयितुं॰ शोधयितुं॰ पुष्टंकारयितुं॰ लूनंकारयितुं॰ गच्छामि॰ दैवयोगेन॰ पश्या ॥११३॥

मि·नपश्यामि·वा·स्त्रीशरीरं निपतितं॥शका॰ हंहो इति वित्तकैः॥अधिकरणिकभोजकाः॥किमि
ति·न·जानामि॥तां तादृशीं·नगरमंडनं·कांचनशतभूषणां·केनापि·कुपुत्रेण·अर्थकल्यवर्त्त
स्य·कारणात्·शून्यं·पुष्पकरंडकजीर्णोद्यानं·प्रवेश्य·बाहुपाशबलात्कारेण·वसंतसेना·मा
रिता॥न मया॥व्यवहारस्य·पदं·स्थाने·कायस्थैः॥यत्त्॥आर्यः आज्ञापयति॥आर्य लिखितं श
का॰ ही·मादिके·भये·खेदे·चाऽव्ययं॥उत्तलाग्रतेणत्वरया॥त्वरां·कुर्वाणेनेत्यर्थः॥उत्पतताचे
त्यर्थः॥इव·पायसपिंडरकेन·अद्य·मया·आत्मा॥एव निर्नाशितः॥भवतु·एवं तावत्॥अहो अ
धिकरणभोजकाः·ननु·भणामि·मया·एव·दृष्टा·किं कोलाहलं·कुरुत॥शका॰ हंहो·नूनं·शून्य

॥मृ॰टी॰१॰अं॰॥ शून्यया॰मोघस्थानया॰ग्रीवालिकया॰निःसुवर्णकैः॥आभरणस्थानैः तर्कयामि शून्यां॰व॰शून्या
॥११४॥ उच्छूना॰उच्छोथवतीत्यर्थः॥ग्रीवालिका॰ग्रीवैव॥श्रे॰का॰॥युज्यते इव॥शकारेणैव मारितेति
114 प्रयुज्यते इत्यर्थः॥शका॰दिष्ट्या॰प्रत्युज्जीवितोस्मि॥ अविदग्धादिके॥खेदे॥श्रे॰का॰भोः॰एष॰
व्यवहारः अवलंबते॥कीदृशः॥श्रे॰का॰॥शकारवाक्यानुसारेणायं व्यवहारः इति प्रत्यर्थिनं
आहतुः॥ततः॰वसंतसेनामातरं अवलंबते॰व्यवहारः॥शोध॰एतु॰आर्या॥वृद्धेइयं॰वसंत
सेनाजननी॥वृद्धा॥गता॰मे॰दारिका॰मित्रगृहं आत्मनो यौवनं॰मनुभवितुं॥एष पुनर्दीर्घायु ॥राम॥
र्भणति॥आगच्छ॰अधिकरणिकः॰आह्वयति॥ततः॰मोहपरवशः॰इव॰आत्मानं अवगच्छा ॥११४॥

मि॥ हृदयं मे प्रकंपते॥ आर्य आदिश मे मयं॥ अधिकरणमंडपस्य मार्गं॥ शो॰ ध॰ एतु २ आर्यो॥ शो॰ ए
ष अधिकरणमंडपः अत्र प्रविशतु आर्यो॥ वृद्धा॥ सुखं युष्माकं भवन्तु भावमिश्राणां॥ शका॰ आगता
ऽस्मि वृद्धकुट्टकुट्टिनि॥ आगताऽस्मि॥ वृ॰ अथ किं॥ वृद्धा मित्र गृह॥ वृ॰ हद्धी २ अतिलज्जनीयं ख
लु एतत्॥ जनस्य॥ पृच्छनीयः प्रष्टव्यः॥ अयं अर्थः न पुनरधिकरणिकस्य॥ श्रे॰ का॰॥ व्यवहारः पृच्छ
ति नास्ति दोषः कथय॥ वृद्धा॥ कथं व्यवहारः॥ यदि एवं तदा शृण्वंतु आर्यमिश्राः स खलु सार्थवा
हविनयदत्तस्य नप्ता सागरदत्तस्य तनयः सुगृहीतनामधेयः आर्यचारुदत्तो नाम श्रेष्ठिचत्वरे प्र
तिवसति तत्र मे दारिका यौवनसुखमनुभवति॥ शका॰ श्रुतं आर्यैः लिख्यंतामेतानि अक्षरा

॥मृ॰टी॰ दॆअं॥ णि॰ चारुदत्तेन॰ सह॰ मम॰ विवादे॥ श्रे॰ का॰॥ चारुदत्तो मित्रमित्तिनास्तिदोषः॥ श्रे॰ का॰ एवमिव॥ धनद
॥११५॥ त्तेति॰ नाम॰ कायस्थस्य॥ शो॰ यत्र आर्यः आज्ञापयतिइति॥ एतु२आर्यः॥ परिज्ञातस्येत्यनुष्टुप्॥ ७
115 ज्ञातः इति॥ वसंततिलकं॥ सः यैओकः॥ ५॥ शो॰ एतु२आर्यः॥ चारुदत्तस्याऽनिष्टसूचकानि अपश
कुनानीति बोध्यं॥ रूक्षेति वायसः काकः॥ वासति॰ चंचूपुटः मुहुरस्य॰ विरौति॰ तत्रापि रूक्षस्वरं यथा
स्यात्तथा सव्यं॰ वामं॥ अनिमित्तानि॥ अपशकुनानि॥ ८॥ शोध॰ एतु२आर्यः हे रंमसंभ्रांतं॥ चारु
श्रुक्षेत्यनुष्टुप्॥ पूर्वाह्णे चैकऽमपशकुनं ठत्तराईं चापरं इति बोध्यं॥ ९॥ मयीति॥ मालिनीछंदः ॥रामः॥
भिन्नः कज्जलराशिमध्येऽधिकनीलइत्युत आह भिन्नेति॥ नीलाऽञ्जनं॥ कज्जलं॥ अंययः सर्पः ॥११५॥

मे मार्गः माक्रम्य सुप्तः स्कंविनिहितेत्यादिषड्विशेषणविशिष्टः मयि अभिपततीत्यन्वयः॥ जिघि
ता वक्रिता आध्माता शब्दिता च कुक्षिर्येनेत्यर्थः॥ २४॥ स्खलतीति॥ हरिणीप्लुता छंदः॥ स्पष्टं॥ २
२॥ शोधः एतु आर्यः इमं अधिकरणमंडपं प्रविशतु आर्यः॥ चाण॥ चिंतेति राजाकरणं॥ अधिक
रणं॥ क्वचित्तु राजभवनं इति पाठः॥ स्फुटः एव॥ ततः हिंस्रैः॥ हिंसाकृच्चिभिर्नरैः रुपलक्षितं॥ समु
द्रायते॥ समुद्रः इवाचरति समुद्रायते॥ समुत्क्रांतं काडितिसूत्रेण काङ्॥ चिंतायां॥ आसक्ता निम
ग्नाः मंत्रिणः एव सलिलानि यत्र तत्तथा॥ दूताः॥ वकीलाः एव ऊर्मयः॥ महातरंगाः॥ शंखाश्च तैः या
कुलं॥ परितः स्थिताः चाराः भयः एव नक्राः॥ मकराश्च यत्र तत्॥ येषां पादाऽधस्ताद्बध्याः दीयंते ते ना

॥मू॰टी॰ ९अ॰॥ गाः गजाः ॥ आप्यास्यन्ते एव हिंस्राः ते षां आश्रयः स्थानं इत्यर्थः ॥ नाना· बहुप्रकाराः वाशकाः शब्दं कु
॥११९॥ र्वाणाः कर्णजपाः पिशुना एव ककपक्षिणः तैः रुचिरं ॥ वाशृ शब्दे· धातुः ॥ नीतिरेव ॥ क्षुमः· चूर्णीकृ
116 तं ॥ उच्चनीचं ॥ तटं यत्र तत् तथा ॥ ४३ ॥ सर्व्वं इति अनुष्टुप् ॥ दैवेन इति दैवतः ॥ अस्मासु स्वस्ति· चा
ऽस्तु ॥ ४४ ॥ घोणोन्नतं इति ॥ घोणा· नासा उन्नता यत्र तत् मुखं ॥ अपांगविशालनेत्रं चास्ति ॥ एतत् च
रुदत्तरूपं ॥ अकारणानां· कारणशून्यानां दूषणानां दोषाणां· भाजनं पात्रं· हीति निश्चयेन· नास्ति
आकृतिः ॥ स्वरूपं सुसदृशं· स्वऽनुरूपं ॥ वृत्तं आचरणं ॥ यः व्यवहारः अहो धर्मः ॥ व्यवहारः यत् एत ॥राम॥
त· अन्यस्य· स्त्रीघातकस्य· आसनं· दीयते ॥ सगर्वं· भवतु· ननु· दीयतां ॥ वृद्धा ॥ तात· चिरं· मे· जीव· ॥११९॥

अयं स चारुदत्तः ॥ सुनिक्षिप्तं खलु दारिकया यौवनं ॥ शका० लज्जया अथवा ॥ भीरुतया ॥ वा

चारित्रं अलीकं निगूहितुं स्वयं स्त्री मारयित्वा ॥ अर्थकारणाय ॥ निगूहति न तत् हि भट्टकः

श्रेष्ठी ॥ आर्य चारुदत्त भण अलं लज्जया व्यवहारः खलु एषः ॥ व्यवहार इत्यनुष्टुप् ॥ सुप्रसि

द्धः शास्त्रे लोके चेत्यर्थः ॥ शद्द श० अरे मया सह व्यवहारः ॥ श० ॥ अरे स्त्रीघातक त्वं तावद् इथी र

त्नं शत्तभूषणं वसंतसेनां मारयित्वा सांप्रतं कपटकापटिको भूत्वा निगूहसि ॥ श्रे० कथं

गता कदा गता गच्छंती वा केन अनुगता ॥ श्रे० आर्य कथय ॥ शका० मदीयं पुष्पकरंडकजीर्णो

द्यानं प्रवेश्य अर्थनिमित्तं ॥ बाहुपाशबलात्कारेण मारिता ॥ अये सांप्रतं वदसि गृहं गतेति

॥मृ॰टी॰र्दअं॥ अभ्युक्षित्तोसीति॥ चाषस्य॰पक्षिणः॰पक्षाग्रं॰तत्सदृशं॰अपि॰मेघानां॰ बिंदुभिर्न॰अभ्युक्षितः॰सि

॥११७॥ क्तः॰असि॥ उक्ष॰सेचने॥ अंतराले॰गगने॥ सर्वं॰मिथ्या॰वदसि॰अतः॰पापिनस्ते॰मुखं॰मलिनमित्याह

११७ मिथ्यैतद्दाननमित्यादिना॥ ४७॥ अकृतपापस्य॰सप्रभं॰मुखमिदं॰दृश्यते॰ऽतः॰चारुदत्तस्य॰दू

षणमसंभवग्रस्तमित्याह॰तुलनं॰इति॥ ४८॥ घोणेत्यादीति॥ घोणोन्नतं॰मुखमिति॰श्लोके॰इत्यर्थः

यकाः॰किं॰पक्षपातेन॰व्यवहारो॰दृश्यतां॥ वेदार्थानिति॥ प्राकृतः॰नीचः॥ असौ॰प्राणिः॰देहः॰हर

त्ति॰भूरिति॥ भूमिर्विदीर्यं॰कुतो॰न॰त्वां॰गिलतीत्यर्थः॥ ४९॥ कृत्वेति॥ उदकेन॰उदकस्य॰वा॰उच्छू ॥राम॰॥

यः॰उच्छ्वता॰एव॰शेषो॰यस्य॰तं॰समुद्रं॥ समुद्रस्योदकमहत्तयैव॰महत्त्वेन॰पुनः॰संपद्भिरित्यर्थः ॥११७॥

यत्·वीरैः·नै·जुष्टं·सेवितं·पापं॥२॥शकाः·किं·पक्षपातेन·व्यवहारो·दृश्यते॥वृद्धा॥हताश
यः·इदानीं·न्यासीकृतं·सुवर्णभांडं॥रात्रौ·चौरैः·रपहृत·मिति॥तस्य·कारणात्॥चतुःसमुद्र
सारभूतां·रत्नावलीं·ददाति·स·इदानीं·अर्थकल्पवर्त्तस्य·कारणात्·इदं·अकार्यं·करोति॥हा
जाते·एहि·मे·पुत्रि॥वीरकः॥पादप्रहारेत्यार्याछंदः॥पादप्रहारपरिभवविमाननाऽऽबद्ध
गुरुकवैरस्य॥अनुशोचतः·इयं·कथमपि·रात्रिः·प्रभाता·मे॥२४॥तद्यावदधिकरणमंडपमु
पसर्पामि॥सुखं·शुभं·इति·वा॥आर्यमिश्राणां॥वीरः·हीः·बंधनभेदनसंभ्रमे॥आर्यकं·अन्वे
षयन्॥अपवारितं·प्रवहणं·व्रजतीति·विचारं·कुर्वन्·अन्वेषयन्·अरे·त्व·यापि·आलोकि

॥ मृ॰क॰टी॰टि॰ ॥ तं· मयाऽपि· आलोकितं व्यमिति· भणन्नेव· चंदन· मत्तरकेण· पादेन· ताडितोऽस्मि ॥ एतत्श्रु
॥ ११८ ॥ त्वा· आर्यमिश्राः प्रमाणं ॥ वीरः· अस्य आर्यचारुदत्तस्य· वसंतसेना ॥ आरूढा· पुष्पकरंडकजी
118 र्णोद्यानं· क्रीडितुं ॥ नीयत्ते· इति· प्रवहणवाहकेन· कथितं ॥ शकारः· पुनरपि श्रुतं आर्यैः ॥ एवमो
इत्यनुष्टुप् ॥ एषः ॥ चारुदत्तः अप्रस्तुतप्रशंसालंकारः ॥ २२ ॥ यतः आर्यः आज्ञापयति ॥ गतोऽ
स्मि ॥ तत्र· दृष्टं च· मया· स्त्रीकलेवरं· श्वापदैः· विलुप्तं ॥ श्रेष्ठी ॥ कथं· त्वया· ज्ञातं· स्त्रीकलेवरमिति
वीरः ॥ सावशेषैः· केशहस्तपाणिपादैः उपलक्षितं· मया ॥ यथेति ॥ व्यवहारस्य· न्यायस्य· नी ॥ राम ॥
तस्य ॥ सुसन्नाः यत्प्राप्तं तत्कर्तव्यमेवेत्यर्थः ॥ अत एवाऽऽह· मतिरिति ॥ ब्राह्मणत्वादपीत्य ॥ ११८ ॥

र्थः॥२३॥ यथैवेति॥ पुष्पं पात्तुं पतंतीत्यन्वयः॥२४॥ दुष्टात्मेति प्रहर्षिणीछंदः॥ स्पष्टं॥२५॥ योऽ
हमिति॥२६॥ शका॰ हंहो अधिकरणभोजकाः किं युष्माकं पक्षपातेन व्यवहारं पश्यत येन
अद्यापि एष हताशचारुदत्तः आसने धार्यते॥ शका॰ ही अनेन॥ मदीयछद्मकरणेनेत्य
र्थः॥ मया कृतं पापं अन्यस्य मस्तके निपतितं॥ तत् यत्र चारुदत्तः उपविशति तत्र अहं उ
पविशामि॥ चारुदत्त॰ पश्य मां तत् भण॰ मया मारिताइति॥ विदूषकं मित्रं स्मृत्वाऽहमैत्रे
येति॥ धूर्त्तानाम्नीं पत्नीं स्मृत्वाऽह ब्राह्मणीति॥ रोहसेनः पुत्रः॥ परेण व्यसनेन उपलक्षितोऽपि
त्वं नित्यं मिथ्यैव नंदसि॥२७॥ विदूषकः॥ प्रेषितोऽस्मि आर्यचारुदत्तेन वसंतसेनासकाशं॥

॥मृ॰ टी॰ दि॰ अं॰ ॥ तत्र अलंकरणानि गृहीत्वा ॥ यथा आर्यमैत्रेय ॥ वसंतसेनाया ॥ वत्सो रोहसेनः अलंकारेण अलं
॥११८॥ कृत्य ॥ जननीसकाशं प्रेषितः अस्य आभरणं दातव्यं न पुनर्गृहीतव्यं ॥ तत्त समर्पयेति ततः या
119 वत् वसंतसेनासकाशंमेव गच्छामि ॥ अस्य रोहसेनस्य दातव्यऽऽमाभरणं त्वया गृहीतुयोग्यं
नेत्यर्थः ॥ रोहसेन खेलन मृच्छकटिकापूरित्तानिइमानिभूषणानि वसंतसेनया इत्यादि स्मर
रणीयं ॥ तेषामेषांबहुत्वात्प्रत्यर्पणं ॥ वसंतसेनया तु सुवर्णशकटिकायै रुदतो रोहसेनस्य
लालनं कृतमित्यादि ध्येयं ॥ किं निमित्तं त्वं उद्विग्नः उद्विग्नः इव लक्ष्यसे ॥ किं भणासि प्रियवय ॥राम॥
स्यः चारुदत्तः अधिकरणमंडपं ॥ सद्भावी अस्ति ॥ आहूयते इति ॥ ततः न खलु अल्पेन कार्येण भ ॥११८॥

वितव्यं॥ तत्‌· पश्चा॥ पश्चात्‌॥ वसंतसेनासकाशं गमिष्यामि॥ अधिकरणमंडपं तावत्‌ गमिष्यामि॥
अयमधिकरणमंडपः तत्‌ यावत्‌ प्रविशामि॥ सुखं अधिकरणभोजकानां॥ कुत्र· मम· प्रियवय
स्यः॥ विदू॰ वयस्य· स्वस्ति ते॥ विदू॰ अपि· क्षेमं ते॥ विदू॰ भो वयस्य· किंनिमित्तं ठद्विग्नउद्विग्नः इव॥
लक्षसे· कुतो वा· आहतः॥ मया खलु इत्यनुष्टुप्‌॥ रुप॥ विदू॰ रुकिं रुकः· एव· भणति॥ कृतांतः॥ यमराजः
व्याहरति॥ वसंतसेना मया· मारितेति वदतीत्यर्थः॥ विदू॰ एव· किमर्थेन· भण्यते· गृहं गतेति॥ अ
वस्थायाः दारिद्र्यरूपायाः दोषात्‌॥ विदू॰ भोः आर्याः· येन तावत्‌· पुरस्थापनः विहाराऽऽराम देवा
लय· तडाग· कूप· यूपैः अलंकृता· नगरी उज्जयिनी सः अनीशः अर्थकल्पवर्तकारणात्‌· इदृशं

॥मृ·टी·६अं॥ अकार्यं·अनुतिष्ठतीति॥पुरस्थापनं·पुराऽवस्थितिः॥विहारः॥जैनमंदिरं॥आरामः॥उपवनं॥अरे
॥१२०॥ रे·काणेलीसुत·राजश्यालः॥संस्थानक॥दुःशंकन·कृतजनदोषभांडवहुसुवर्णमंडितमर्कटक
120 भणः·मम·अग्रतः·यः·इदानीं·मम·प्रियवयस्यः·कुसुमितां॥माधवीलतां·अपि·आकृष्य·कुसुमा
वचयं·न·करोति·कदापि·आकृष्टतया·पल्लवछेदो·भवतीति·स·कथं·इ·इत्थं·अकार्यं·उभयलो
कविरुद्धं·करोति॥तिष्ठरे·कुट्टिनीपुत्र·यावत्·एतेन·तव·हृदयकुटिलेन·दंडकाष्ठेन·मस्तकं
ते·शतखंडं·करोमि॥शका॰·शृण्वंतु·आर्यमिश्राः॥चारुदत्तकेन·सह·मम·विवादे·व्यवहारे·वा ॥राम॥
ततः·किमर्थं·एषः॥काकपदशीर्षमस्तकः·दुष्टबटुबकः·मम·शिरः·शतखंडं·करोति॥मा·तावत् ॥१२०॥

रे दास्याः पुत्र दुष्टबटुबक ।। विदू० पूर्वोक्तं ।। भो अज्ञा इत्ति अरेरे काणेलीसुत्तेत्यादि च ।। शकारुप
श्यंतु आर्याः एते खलु तस्याः तपस्विन्याः ।। अलंकाराः ।। तस्याः ।। वसंतसेनायाः ।। शोच्यायाः ।। केसका ।
तदीयाः इत्यर्थः ।। अस्य चारुदत्तस्य ।। अर्थकल्पवर्त्तस्य कारणाय एषा मारिता व्यापादिता च ।।
एषा ।। वसंतसेनेत्यर्थः ।। अयमेवं इत्यनुष्टुप् ।। पत्तितः ।। विदूषककक्षादेशात् ।। मां पातयिष्यति
।। २९ ।। विदू० भो किमर्थं मृतार्थः न निवेद्यते ।। दुर्बलं इत्यनुष्टुप् ।। मया न मारितेत्ति वदतः ।। ३० ।।
अंगारकेत्ति ।। अंगारकः मंगलः तेन सह विरुद्धस्य ।। अंगारकः ।। विरुद्धो यस्येति सम्यगर्थः ।। इयम
प्रस्तुतप्रशंसा ऽलंकृतिः ।। अंगारक इव शकारः ।। बृहस्पतिवत् चारुदत्तः ।। विदूषककक्षादेशा

॥मृ॰टी॰८॰अं॰॥ दलंकारप्राप्तो धूमकेतुरिवेत्यादि ध्येयं धीवरैः ॥ ३१ ॥ श्रेष्ठी ॥ अवहिता॰ तावत्॰ आर्या॰ एतत्त॰ सुवर्ण

॥१२१॥ भांडं ॥ अवलोकत्तां॰ तदेव॰ एतत्त॰ न वे॰ ति ॥ वृद्धा ॥ सदृशः एषः एव न पुनः सः ॥ शका॰ आं वृद्धकुट्टिनि॰

अक्षिभ्यां मंत्रितं॰ वाचा॰ मूर्ख्किकं ॥ वृद्धा ॥ हताश अपेहि ॥ श्रेष्ठी ॥ अप्रमत्तं॰ कथय॰ स॰ एव॰ एषः॰ नवे॰

ति ॥ एषः ॥ अलंकारः ॥ वृद्धा ॥ आर्य॰ शिल्पिकुशलतया॰ अवबध्नाति॰ दृष्टिं॰ न॰ पुनः सः ॥ वृद्धा ॥ ननु भणा

मि ॥ न खलु २ अन्यतः ॥ अथ ॥ कदापि केनापि॰ शिल्पिना॰ घटितो भवेत् ॥ वस्त्वंतराणीति ॥ कृतहस्त

ता॰ शिल्पकुशलता ॥ हस्तलाघवमित्यर्थः ॥ अत एव॰ कृतहस्ततया रिपुकुलमिषुवर्षेणाऽभि॰ ॥राम॰॥

पात्येत्युक्तं दशकुमारे ॥ हस्तशब्देन॰ हस्तादिशिल्पं ॥ कृतपदेन॰ बहुव्रीहिः ॥ ३२ ॥ श्रेष्ठी आर्यचारु ॥१२२॥

दत्तस्य·केरकाणि·तदीयानि·एतानि॥ श्रे॰ तदा·कस्य॥ अत्रभवत्याः पूज्यायाः॥ श्रे॰ कथं·एता
नि तस्याः॥ वसंतसेनायाः॥ वियोगगतानि॥ चारु॰ एवं गतानीति॥ सुवर्णेशकटिये·रोदनं कुर्वन् रो
हसेनः॥ सममलंकृत्य प्रेषितो वसंतसेनयेत्यादि·सर्वमेवं पदस्याऽर्थः आं·आंगीकारे॥ इदं॥ यदुक्तं
त·दिदं·वृत्तांतजातमित्यर्थः॥ श्रेष्ठी॥ आर्य·चारुदत्त·अत्र·सत्यं·वक्तव्यं॥ पश्यत॥ सत्येन·सुखं
खलु·लभ्यते·सत्यालापे·न·भवति·पापकं·सत्यं·इति·द्वे·अपि·अक्षरे·मा·सत्यं·अलीकेन·गू
हय॥ ३४॥ असत्येन·सत्यं·मा·गूहेहि·मा·गो·पयेत्यर्थः॥ चा॰ आभरणानि·भूषणानि·इमानि
आभरणानि·उदरदरीपरीपूरणकरणानीत्यर्थः॥ इति न ज्ञाने॥ डुभृञ्धारणपोषणयोः॥ शका॰ ज्ञया

॥मृ॰टी॰१०अं॥ नं प्रवेश्य प्रथमं मारयसि कपटकापटिकत्तया सांप्रतं निगूहसि॥ इदानीमिति॥ कशातुरगघातनीति
॥१२२॥ कोशः॥ ३४॥ अपापानां इति॥ ३५॥ मयाकिलेति॥ नृशंसो घातकः क्रूरः इत्यमरः॥ एषः॥ राजश्यालः शका
122 रः इत्यर्थः॥ ३६॥ शकारः व्यापादिता॥ अरे त्वमपि भणा मया व्यापादितेति॥ शकारः शृणुत भट्टारकाः
एतेन मारिता॥ एतेन एव संशये छिन्ने एतस्य दरिद्रचारुदत्तस्य शरीरे दंडो धार्यतां॥ वृद्धा॥ प्रसीदं
तु आर्यमिश्राः यस्तावत् चौरैरपहृतस्य॥ इत्यादि पूर्वोक्तं इति॥ हदाश जो दाणिं णाशीकरंसु
वण्णभंडअं रत्तिं॥ चोरेहिं अवहदं त्ति तस्स कालणादो चदुस्समुद्दसारभूदं रअणावलिं दिंदै सो दाणिं ॥राम॥
अत्यकल्लवत्तस्स कालणादो इदं अकज्जं करेदि इदं पूर्वोक्तमित्यर्थः॥ तदा यदि व्यापादिता मम दा ॥१२२॥

रिका व्यापादिता ॥ जीवतु मे दीर्घायुः ॥ अन्यच्च ॥ अर्थिप्रत्यर्थिनोर्व्यवहारः न च हे अे अर्थिनी तत मुंच
त एतं ॥ शकाः अपेहि गर्भदासि ॥ गच्छ किं तव एतेन ॥ वृ॰ हा तात हा पुत्रक ॥ शकाः कृतमया एतस्य
आत्मनः सदृशं सांप्रतं गच्छामीति ॥ अयं हीति श्लोकः ॥ ३४ ॥ शोध॰ यत आर्यः आज्ञापयति ॥ आर्यागृ
तोऽस्मि तत्र ॥ राजा पालको भणति येन अर्थकल्पवर्त्तस्य कारणात् वसंतसेना व्यापादिता तं
तत्रैव आभरणानि गले बंधयित्वा डिंडिमं ताडयित्वा दक्षिणश्मशानं नीत्वा शूले भंजत इति
यः कोपि अपरः इदृशः मकार्यं अनुतिष्ठति स एतेन सनिकारदंडेन ॥ शास्यते ॥ इदृशेइति श्लोकः
स्थाने योग्यं इत्यर्थः ॥ युक्ते हे सांप्रतं स्थाने इत्यमरः ॥ कृपणां दीनां नारकी या इत्यर्थः ॥ ३५ ॥ ईदृशैरि

॥ मृ॰ टी॰ ६ अं॰ ॥ तिश्लोकः ॥ श्वेतकाकीयैश्वेतकाकसदृशैः ॥ इवार्थेष्ठः ॥ उत्पातकल्पैरित्यर्थः ॥ राज्ञः शासनस्य दूषकैः
॥ १२३ ॥ पापात्मभिर्मन्त्रिभिः ॥ ३१ ॥ अंबा ॥ चारुदत्तमाता ॥ विट्ठ॰ मूले॰ छिन्ने॰ कुतः पादपस्य पालनं ॥ नृत्यामि
123 तिश्लोकः ॥ देहस्य प्रतिकृतिः ॥ प्रतिमा॰ द्वितीयो देहः इत्यर्थः ॥ तथा च श्रुतिः ॥ सा॰ जाया॰ भवति॰ यद
स्यां॰ जायते॰ पुनः इति ॥ अंगादंगात्संभवसि॰ हृदयादधिजायसे ॥ आत्मा॰ वै॰ पुत्रनामाऽसि॰ स ॥
जीव शरदः शतं इति च ॥ ३२ ॥ विट्ठ॰ भाव यस्य अहं ते प्रियवयस्यो भूत्वा॰ त्वया॰ विरहितान् ॥
प्राणान् धारयामि ॥ वि॰ एव युज्यते ॥ शो॰ इतः आगच्छतु आर्यः ॥ मैत्रेय भो रित्ति पूर्वोक्तं पद्यं इत्य ॥ राम॰ ॥
र्थः ॥ विषेति ॥ मालिनीछंदः ॥ विषं च सलिलं च तुला च अग्निश्च एभिः प्रार्थित॰ विचारे॰ परीक्षायां ॥ १२३ ॥

सत्यां अपि ॥ इह शरीरे अथ ककचं दातव्यं ॥ अथ पुनः ॥ रिपोः शकारस्य राजश्यालस्य ॥ राज्ञानं
पातकं प्रत्युक्तिरियं ॥ विषं भक्षयित्वाऽपि न मृतश्चेत्तद्विषपरीक्षा ॥ विषेणाशयथः इत्यर्थः
अग्निनातु प्रसिद्धैव परीक्षा ॥ तुलापरीक्षापि स्फुटा शास्त्रे ॥ एवमादिज्ञेयं विज्ञैरिति ॥ ६४ ॥ इति
श्रीमृच्छकटिकप्रकरणव्याख्यायां सुवर्णालंकरणाऽऽख्यायाऽमनंतमंगलाऽऽवासवसंतसे
नामोटनो मिथ्याऽपराधचारुदत्तनिग्रहो नाम नवमोंकः ॥ समाप्तिमापत्तः ॥ ❀ ॥ १२ ॥ ७ ८ ॥ ❀ ॥

अचिरेणशीर्षच्छेदनशूलारोपेषु कुशलौ स्वः ॥ १ ॥ अपसरत आर्याः अपसरत ॥ एष आर्यचारुदत्तः

॥मृ·टी·१०अं॥ दिमेत्यार्याछंदः॥ दत्त·करवीर·दामा·गृहीत॥ आवाभ्यां वध्य पुरुषाभ्यां॥ दीपः इव मंदस्नेहः स्तोकं
॥१२५॥ स्तोकं क्षयं याति॥ २॥ दाम·माला·नयनेत्ति॥ मालिनीछंदः॥ पांसु॥ धूली॥ पितृवनस्य॥ श्मशानस्य॥ सुम
125 नोभिः पुष्पैः॥ विरसं·रूक्षं यथास्यात्तथा॥ रटंतः वायसाः काकाः कर्कयंति उत्प्रेक्षते इत्यर्थः॥ ३॥
चांडालौ॥ अपसरत आर्याः अपसरत॥ किं·पेक्खधेत्यार्याछंदः॥ किं पश्यत·छिज्जंतं छिद्यमानं
सत्पुरुषं·कालपरशुधाराभिः॥ सुजनशकुनाधिवासं·सज्जनपुरुषद्रुमं रत्त॥ ४॥ आगच्छ·रे·चा
रुदत्त·आगच्छ॥ सर्वेत्यनुष्टुप्॥ हस्ताः इव हस्तकाः हस्तचिन्हानि॥ इवार्थे कन्॥ पिष्टचूर्णाभ्यां अ ॥राम॥
वकीर्णः व्याप्तः॥ पिष्टं तंडुलानां॥ चूर्णं तिलानां॥ अपशुः मनपशुः यथा संपद्यते तथा कृतः पशूकृ ॥१२५॥

तः॥ पसुः देवीबलिदानायच्छागादिः॥ ४॥ तारतम्यं॥ भेदः॥ अमीहीति॥ मयाऽउपेतं प्राप्तं॥ रततः॥ नि
रपराधवधादिकुः खं॥ दुष्टा॥ मर्त्यः॥ मरणधर्माणां॥ ह॥ चांडालौ॥ अपसरत आर्याः अपसरत॥ किंप
श्यत॥ इदेइत्यार्याछंदः॥ दु दुः प्रवाह्यमानो गोप्रसवः संक्रमश्वताराणां॥ सुपुरुषप्राणविपत्तिः च
त्वारः इमेन दृष्टव्याः॥ ७॥ एकः हंडेइत्ति संबुद्धिराह्वाने॥ आहींता इति द्वितीयस्य चंडालस्य ना
म॥ पश्यच॥ गाअलीइत्यार्या॥ नगरीप्रधानभूते॥ वल्मी अंते॥ वध्यमाने॥ कृतांताऽज्ञया॥ किंरोदि
ति॥ अंतरिक्षं आक्रु॥ अथवा अनभ्रं पततिवज्रं॥ ८॥ द्वितीयः॥ अरे गोहा इति प्रथमचांडालना
म॥ गाअलुअदीत्यार्या॥ नचरोदिति अंतरिक्षं नैव अनभ्रं पततिवज्रं॥ महिलासमूहमेघात्

॥मृ·टी·१०·अं॥ निपतत्ति·नयनांबुधाराभिः॥९॥अपिच वध्यम्मि इत्यार्या॥वध्ये·नीयमाने·जनस्य·सर्वस्य·रो
॥१२५॥ दमानस्य॥नयनसलिलैः सिक्तोरथ्यातोनउन्नमतिरेणुः॥१०॥एताः इतीद्र वज्राछंदः॥वाताय
125 नं गवाक्षः स्यात्॥११॥चांडालौ॥आगच्छतः रे·चारुदत्त·आगच्छ॥इदं घोषणस्थानं॥आहत·डिंडि
मं॥घोषत्त घोषणां॥उभौ चांडालौ इत्यर्थः॥शृणुत·आर्याः·शृणुत॥एष·सार्थवाहविनयदत्तस्य
नप्ता·सागरदत्तस्या पुत्रकः·आर्यचारुदत्तोनाम·एतेन·किल·अकार्यकारिणा॥गणिका·वसं
तसेना·अर्थकल्पवर्त्तस्य·कारणात्·शून्यं पुष्पकरंडकजीर्णोद्यानं·प्रवेश्य·बाहुपाशबलात्का ॥राम०॥
रेणमारित्तेति एष·सगोत्रोगृहीतः स्वयंच प्रतिपन्नः॥तदा·राज्ञा·पालकेन·वयं·आज्ञप्ताः·एतं मा ॥१२५॥

रयितुं॥ यदि· अपरः ईदृशं· उभयलोकविरुद्धं अकार्यं· करोति· तमपि·राजा· पालकः एवमेव· शास्ति
मस्वयतेति॥ मालिनीछंदः॥ सदसि॥ यज्ञस्य महति मंडपे· निबिडानि· घनानि· चैत्यानि· आयतनानि
तत्र· ब्रह्मणां॥ वेदानां· घोषैः· मे· गोत्रं कुलं उद्भासितं आसीत्॥ पापैः· असदृशैः॥ अननुरूपैः योग्यैः
चांडालादिभिर्मनुष्यैः घोषणायां॥ तत्॥ मम· गोत्रं॥ घुष्यते इति महाऽनर्थः इति भावः॥ गोत्रं नार
म्नि· कुलेऽचले इति कोशः॥१५॥ शशिविमलेति॥ पुष्पिताग्राछंदः॥ अवशः॥ पराधीनः॥ अयशोरूपं
विषं॥१६॥ उभौ॥ चांडालौ इत्यर्थः॥ अपसरत आर्याः अपसरत॥ एषो इत्यार्याछंदः॥ एष गुणरत्न
निधिः सज्जनदुःखानां उत्तरणसेतुः॥ असुवर्णं मंडनं अपनीयते अद्य नगरीतः॥१७॥ एषः चा

१२८

रुदत्तः॥अन्यच्च॥सव्वे इत्यार्या॥सर्वः खलु भवति लोके लोकः॥सुखसंस्थितानां॥तन्निस्ला॥चिंतायु
क्तः॥विनिपतितानां नराणां प्रियकारी दुःखभो भवति॥१५॥अमीहीति॥स्पष्टो॥उन्नराई सर्वः ख
लु इत्यार्यया समानार्थ॥१६॥चांडालौ॥अपसारणं कृत्वं विविक्तः राजमार्गः॥ तत आनयत ए
तं दत्तवध्यचिन्हं॥हा तात हा प्रियवयस्य॥स्वजातिमहत्तरेति चांडालसंबोधनं॥चांडा॰किं अ
स्माकं च हस्तात् प्रतिग्रहं करोषि॥चां॰॥एवं क्रियतां॥हा तात हा पितः॥चां॰ अरे आगच्छतु आग
च्छतु॥उभौ॥प्रचुराः हेडानाः इत्यर्थः॥क्षणं २ अंतरं दद तः एष आर्यचारुदत्तः पुत्रमुखं पश्यतु ॥रामः॥
आर्य इतः॥आगच्छ रे दारक आगच्छ॥विदू॰ त्वरतां २ भद्रमुखः पिता ते मारयितुं नीयते॰॥दारकः ॥१२६॥

हा पितः हा तात॥ विट्ठ॥ हा प्रियवयस्य कुत्र मया त्वं द्रष्टव्य॥ चिरमिति श्लोकः॥१४॥ अमौक्तिकमिति
श्लोकः॥ येन॥ यज्ञोपवीतेन॥१५॥ चांडा॰ आगच्छ रे चारुदत्त आगच्छ॥ द्वितीयः॥ अरे आर्यचारुदत्त-
निरुपपदेन आर्येत्यादिविशेषणशून्येनेत्यर्थः॥ नाम्ना आलपसि॥ अरे पश्य॥ अब्भुअे इत्या-
र्याछंदः॥ अभ्युदये अवसाने तथा त्वं रात्रिंदिवं अहतमार्गा॥ उद्दाममेव किशोरी नियतिः खलु
परीक्षितुं याति॥१६॥ अन्यच्च॥ सुक्का इत्यार्या॥ शुष्काः व्यपदेशाः॥ ये अस्य किं प्रणमितमस्तकेन
कर्तव्यं॥ राहुगृहीतोऽपि च चंद्रः न वंदनीयो जनपदस्य॥१७॥ विअ इत्येकपदं वा॥ राहुगृही-
तः इव चंद्रः इत्यर्थः॥ अस्य॥ चारुदत्तस्य॥ व्यपदेशाः॥ कलंकाः॥ वसंतसेनामारितेत्येवंरूपाः॥ अ

॥मु॰टी॰१०अं॰॥ पवादव्यवहाराः॥सुष्काः वृथैवेत्यर्थः॥प्रणमितेन मस्तकेन किं कर्त्तव्यं॥सीमास्यास्यचारुदत्त
॥१२७॥ स्य लज्जायाऽवनतमस्तकोपि न त्वमसीतिभावः॥तत्र राहुगृहीतेंदुर्दृष्टांतः इत्यवगंतव्यं॥२१॥वा
सकः॥अरे२ चांडालाः कुत्र॥आवुकं॥ममपितरं धैर्यं॥नयत॥चारु॰ अंसेनेति॥इंद्रवज्राछंदः॥
आघातं॥अधिकरणीयं॥वधस्थानं॥अध्वरेज्ञैयंजडः॥छागः॥यज्ञपशुः॥आलब्धुं॥आलंभनऽ
मभिमंत्रणपूर्वकंहननं तत प्राप्तुं॥शामित्रं॥यज्ञीयं पशुहननस्थानं॥अनुप्रयाति यथा
तथाऽहऽमद्याऽधिकरणीयं वधस्थानऽमनुप्रयामीत्यर्थः॥शमिता यज्ञे इतिसूत्रं पाणिनेः ॥राम॰॥
वैदिक्यांप्रक्रियायां॥शमितरिभवश्शामित्रं यज्ञेपशुघातस्थानमित्यर्थः॥२१॥चारुदत्तसुतेन ॥१२७॥

अरे२ चांडाल॥ इति संबोध्य आहत्तं आहत्तर माहुः चांडालाः दारक॥ णाहु अस्मे इति॥ आर्याछं
द॥ न खलु वयं चांडालाः॥ चांडालकुले॥ ज्ञातपूर्वाः अपि॥ ये अभिभवंति॥ साधुं ते पापाः ते च चां
डालाः॥ २४॥ दारकः ततः कीस किमर्थं मारयत पितरं॥ चांडा॥ हे दीर्घायुः अत्र राजनियोगः॥ ख
खु अपराध्यति न खलु वयं॥ अवरस्सम्म॥ अपराध्यामः इति विपरिणाम्य विभक्तिऽमन्व
यः॥ दार॥ व्यापादयत मां मुंचत पितरं॥ चांडा॰ हे दीर्घायुरेवं भणान् चिरं मे जीव॥ इदं तदि
ति॥ अनुष्टुप्॥ इदं॥ पुत्ररूपं वस्तु॥ ततः॥ श्रुतिस्मृतिपुराणेषु प्रसिद्धं इत्यर्थः॥ स्पष्टमवशिष्टं
२३॥ असेन बिभ्रदित्याद्यऽनुपदोक्तं पद्यं इत्यर्थः॥ अमी हीति॥ अमी हि वध्यांतनिरुद्ध वक्त्राः॥

॥मृ॰टी॰१०अं॰॥ प्रयांत्तिमेदूरतरं वयस्याः॥ परोऽपिबंधुः समसंस्थितस्य॥ मित्रंनकश्चिद्विषमस्थितस्य॥ इति
॥१२८॥ पूर्वोक्तंपद्यंइत्यर्थः॥ विद्रुतः॥ भो॰ भद्रमुखाः मुंचत॰ प्रियवयस्यं॰ चारुदत्तं॰ मां॰ व्यापादयत॥ मा
128 रयतेत्यर्थः॥ चांडा॰ अपसरत॰ आर्याः अपसरत॥ किंपेक्खधेत्यार्याछंदः॥ किं॰ पश्यत॰ सत्पु
रुषं॰ अयशोवशेन॰ प्रनष्टजीवाशां॥ कूपे॰ खंडितपाशं॰ कांचनकलश॰ मिव॰ मज्जंतं॥ रछे
अपरः॥ चांडालः इत्यर्थः॥ अरे॰ पुन॰ रपि॰ घोष॥ प्राप्तोऽहं इति॥ प्रहर्षिणीछंदः॥ दशा॰वर्त्तौ
ऽववस्थायां इतिकोशः॥ जीवितावसानं॥ जीवितसमाप्तिः तद्रूपं॰ फलंइदं॰ यत्र॰ अवस्था ॥राम॰॥
यां॰ प्राप्तं॥ असौ॥ वसंतसेना॥ त्वया॥ चारुदत्तेन॥ रप॥ स्थावरकः॥ कथं अपापः चारुदत्तः ॥१२८॥

व्यापाद्यते ॥ अहं निगडेन स्वामिना बद्धः भवतु आक्रंदामि ॥ शृणुत आर्याः शृणुत ॥ अस्ति
इदानीं मया पापेन प्रवहणपरिवर्त्तेन पुष्पकरंडकजीर्णोद्यानं वसंतसेना नीता ततो
मम स्वामिना मां न कामयसे इत्ति कृत्वा बाहुपाशबलात्कारेण मारिता न पुनरेतेन आ
र्येण ॥ कथं विदूरतया न कोऽपि शृणोति ॥ तत् किं करोमि आत्मानं पातयामि ॥ यदि एवं
करोमि तदा आर्यचारुदत्तोन व्यापाद्यते ॥ भवतु ॥ अस्याः प्रासादबालाग्रप्रतोलिकातः एते
न जीर्णगवाक्षेण आत्मानं निक्षिपामि ॥ वरं अहं उपरतः न पुनरेष कुलपुत्रविहगा
नां वासपादपः आर्यचारुदत्तः ॥ एवं यदि विपद्ये लब्धो मया परलोकः ॥ हा ॥ आश्चर्यं ॥ न उ

॥मृ॰टी॰१०अं॥ परत्तोऽस्मि॥भग्नो मे॰दंडनिगड॥तत्त॰चांडालघोषं॰समन्वेषयामि॥हं हो चांडालाः अंतरं॥चां
॥१२८॥ डा॰अरे॰कः अंतरं॰याचते॥श्रुणवंत्वित्यादिकवैरनुवादः सुणाध अज्जा सुणाधेत्यादेः चेटवा
१४९ क्यस्यपूर्वोक्तस्येति॥बोध्यं॥कौंपमेवमिति॥२६॥नमीतः इति॥२७॥तेनेति तेन॰शकारेण॥
नकृतं वैरं येन सह मया इत्यर्थः॥विषाऽक्तेन॥विषमिश्रेण॥अंज्जू॰म्रक्षणे इति धातुः॥अ
नुष्टुप्छंदः सर्वत्र॥२८॥चांडा॥स्थावरक अपि॰सत्यं॰भणसि॰॥चेटः॥सत्यं अहमपि॰माक
स्यापि॰कथयिष्यतीति॰प्रासादबालाग्रप्रतोलिकायां॰दंडनिगडेन॰बद्धा॰निक्षिप्तः॥शाकारः ॥रामप॥
मंत्रो गोति॥इंद्रवज्राछंदः॥मांसेन॰तिक्ताऽम्लेन॰भक्तं॰ओदनः॥शाकेन॰सूपेन॰समत्स्यंकेन ॥१२७॥

भुक्तं मया आत्मनः गेहे शालेः॥ कूलेण॥ ओदनेन॥ गुडौयनेन॥ २६॥ भिन्नकंसखंखणाय

भिन्नकांस्यवत्तखंखणायाः कटुविकृतस्वरायाः॥ चांडालवाचायाः स्वरसंयोगः यथा चत्वष

उरकालिंदे॥ उद्घीतः॥ वध्यडिंडिमशब्दः पटहानां च श्रूयते॥ तथा तर्कयामि दरिद्रचारु

दत्तकः॥ वध्यस्थानं नीयते इति ततः प्रेक्षिष्ये॥ द्रक्ष्यामि इति वा॥ शत्रुविनाशो नाम महान्

हृदयस्य परितोषः भवति॥ श्रुतं च मया योपि किल शत्रुं व्यापाद्यमानं पश्यति तस्य अन्य

स्मिन् जन्मान्तरे अक्षिरोगो न भवति॥ वावादयमाणामिति वक्तव्ये वावादयंतं व्यापाद

यंतं आत्मानं मारयंतं इत्यर्थिके यमुक्तिरर्थस्य तथा भावितया शकारवधं द्योतयतीति

॥मृ॰ टी॰ १ अं॰॥ ध्येयं॥ मया खलु विषग्रंथिगर्भप्रविष्टेन इव कीटकेन किमपि अंतरं मार्गमाणेन उत्पादि
॥१३०॥ तं तस्य दरिद्रचारुदत्तस्य विनाशं सांप्रतं॥ अत्र एकेलिकाए॥ आत्मीयायां प्रासादबाला
130 ग्रप्रतोलिकायां अधिरुह्य आत्मनः पराक्रमं पश्यामि॥ हा॥ वितर्के॥ एतस्य दरिद्रचारुद
त्तस्य वध्यं नीयमानस्य एष वृद्धः॥ महान् वृद्धिं प्राप्तः इत्यर्थः॥ जनसंमर्दः जो वेलं॥ यस्यां
वेलायां॥ अस्माद्दृशः प्रवरो वरमानुषो वध्यं नीयते तस्या वेलायां कीदृशं भवेत्॥ वध्यं
वध्यस्थानं॥ कथं एष स नवबलीवर्दः इव मंडितो दक्षिणां दिशं नीयते॥ अथ किं निमि ॥राम॰॥
त्तं मदीयायाः प्रासादबालाग्रप्रतोलिकायाः समीपे घोषणा निपतिता निवारिता च॥ कथं ॥१३०॥

स्थावरकः चेटोपिनास्ति॥ इह मा नाम तेन इतो गत्वा मंत्रभेदः कृतो भविष्यति॥ तत् यावत् एए
नं अन्वेषयामि॥ चेटः॥ भट्टारकः एष स आगतः॥ चां०॥ ॐ शवघेत्यार्याछेदः अपसरत ददत
मार्गं द्वारं पिदधत भवत तुष्णीकाः॥ अविनयतीक्ष्णाविषाणोदुष्टबलीवर्दः इतः एति॥ ३०॥
शका० अरे अरे अंतरं अंतरं ददत॥ पुत्रक स्थावरक चेट एहि गच्छावः॥ चेटः॥ ही अना-
र्य वसंतसेनिकां मारयित्वा न परितुष्टोऽसि॥ सांप्रतं प्रणायिजनकल्पपादपं आर्यचारु
दत्तं मारयितुं व्यवसितोऽसि॥ शका० न हि रत्नकुंभसदृशः अहं स्त्रियं व्यापादयामि॥ स
र्वे॥ अहो त्वया मारिता न आर्यचारुदत्तेन॥ शका०॥ कः एवं भणाति॥ सर्वे॥ ननु एष साधुः॥

॥मृ·टी·१०अं॰॥ शकारः॥अविदमादिके॥खेदेऽव्ययं॥कथं·स्थावरक॥चेटः॥सुष्टु·न·मया·संयतः॥एष·खलु·॥
॥१३१॥ मम·अकार्यस्य·साक्षी॥एवं·तावत्·करिष्यामि॥अलीकं॥मिथ्या॥भट्टारकाःहो॥अहो एषः॥
चेटः॥सुवर्णचोरिकायाः॥हेतौपंचमीयं॥सुवर्णचोरिकाहेतोरित्यर्थः॥मयागृहीतःताडि॥
131 तः·मारितः·बद्धः·च·तत्·कृतवैरः॥एष·यत्·भणति·किं·सर्वं·सत्यं॥खेरं·पुत्रक·स्थावरकचे
ट·एतत्·गृहीत्वा·अन्यथा·भण॥चेटः॥पश्यत·भट्टारकाःअहो·सुवर्णेन·मां·प्रलोभयति॥
शकारः·एतत्·तत्·सुवर्णकं·यस्य·कारणाय·मया·बद्धः॥हंहो इति संमानपूर्वं संबोधनं चां ॥राम॰॥
डालाः·मया·खलु·एषसुवर्णभांडारे·नियुक्तः·सुवर्णं·चोरयन्·मारितः·ताडितः॥तत्·यदि ॥१३१॥

न प्रत्ययध्वं तदा पृष्ठं तावत् पश्यत ॥ चांडाः शोभनं भणन्ति ॥ विडते चेडे ॥ किं ण प्पडववि

वित्तप्तः चेटः किं न प्रतपतिइत्यर्थः ॥ ताडनादिना वित्तप्तः चेटः किं न प्रतपति ॥ संतापेन किं किं

स्वामिविरुद्धं नाचरन्ति न वदन्ति येन स्वामिविनाशः स्यात् अपि तु सर्वमेवाचरन्ति वदन्तीति

निर्गलितार्थः ॥ चेटः ॥ हीमादिके खेदे ॥ ईदृशो दासभावो यत् सत्यकं अपि न प्रत्याय्यते ॥ प्र

त्ययो बोधः न बोधविषयो भवतीत्यर्थः ॥ प्रशस्तं सत्यं सत्यकं प्रशंसायां कन् ॥ आर्यचारु

दत्त एतावान् मे विभवः ॥ सामर्थ्यमित्यर्थः ॥ उत्तिष्ठ भो रिति ॥ वसंततिलकाछंदः ॥ न संवद

न्ति ॥ संवादः प्रामाण्यमिति तान्त्रिकाः ॥ दैवं न प्रमाणतां प्रयातीत्यर्थः ॥ ३१ ॥ चांडालौ ॥ भट्टक

॥मृ·टी·१०अं॥ ताडयित्वा·एतं·चेटं·निष्काशय॥श०॥निस्सरत्वे॥शका०अरे॥चांडालाः·किं·विलंबध्वं·मारयत
॥१३२॥ एतं॥चांडा०यदि·त्वरयसे·तदा·स्वयमेव·मारय॥रोहसेनः॥अरे·चांडालाः॥मां मारयत·मुं
चत·पितरं॥शका०सपुत्रमेव·एतं·मारयत॥रोह०किं·मया·गतेन·कर्त्तव्यं॥आश्रमं·इत्यनु
ष्टुप्·छंदः॥नगरीमिमामुज्जयिनीं परित्यज्य कस्यापि मुनेराश्रमं गंतव्यं·गृहीत्वा·मातरं·
तत्रापि·अद्यैव·गंतव्यं न तु श्वः॥अत्राहमापुत्रेत्यादि॥पितृदोषेण॥वसंतसेनामारणा
पवादरूपापराधेनेत्यर्थः॥३४॥विदू॥भो वयस्य·एवं·त्वया·ज्ञात·त्वया·विना अहं·प्राणान् ॥राम०॥
धारयामीति॥न युज्यते इत्यादि एवमेवाऽऽत्मघातस्य महापातकत्वादिति भावः॥विदू०यु ॥१३२॥

त्कं·नेदं॥ इदं॥ स्वाधीनजीवितस्य प्राणत्यागादि योग्यं नेत्यर्थः॥ किंतु॥ स्नेहशृंखलाबंधनमोचनस्या
ऽशक्यत्वादाहत्तथापीत्यादि॥ तथापि·न·शक्नोमि·प्रियवयस्यविरहितः॥ प्राणान्·धर्तुं·इति·ततः
ब्राह्मणैकं·दारकं समर्प्य·प्राणपरित्यागेन·आत्मनः·प्रियवयस्य·मनुगमिष्यामि॥ भो वयस्य·प
रान यामि·एतं·वधु॥ शकाः॰ अरे·ननुभणामि·सपुत्रकं·चारुदत्तकं·व्यापादयत·इति॥ चांडाः॰ अ
रे·न·हि·अस्माकं·ईदृशी·राजाऽऽज्ञप्तिः॥ यथा·सपुत्र·चारुदत्तं·व्यापादयत·इति॥ ततः·निष्क्रमरे
दारकः॥ चांडाः॰ इदं·तृतीयं·घोषणास्थानं·ताडयत·डिंडिमं॥ शकाः॰ कथं·एते·न·प्रत्ययंते·पौराः
हंहो·चारुदत्त·चटुवकेन·प्रत्ययते·एष·पौरजनः॥ ततः॥ अन्तरणकेलिकाः॥ आत्मीयया॥ जिह्व

॥मृ·टी·१०·अं·॥ या·भणि·मया·वसंतसेनिका·मारित्ते·ति॥शक·॥अरे·चांडाल·गोह·न·भणाति॥चारुदत्त बुड्डबकः॥बु
॥१३३॥ डुबकः इतीयंभाषा॥बडबक इत्तिप्रवंपंति चलोकाः॥तत·भणायत·अनेन·जर्ज्जरवंश खंडेन·सं
133 खलेन·ताडयित्वा॥संखलेन·वध्यपटहडिंडिमवादनदंडेनेत्यर्थः॥चांडा·भो चारुदत्त भण॥प्रा
प्येतद्व्यसनेति॥एतत·यत·व्यसनं वसंतसेनामारणापवादरूपं दुःखं·तदेव·महार्णवः तत्रप्र
पातं·प्राप्येत्यन्वयः॥प्रिया॥वसंतसेना॥३॥श· पुनस्तथैव·भणेत्तिशेषः॥श·॥व्यापादिता॥चांडा·
अरे·तव·वध्यपालिका॥हिं·॥अरे·तव॥प्रथ·अरेवेवं·कुर्मः॥प्रथ·॥अरे यदि॥ममकेलिका॥मदी ॥राम॥
या॥वध्यपालिका·तदा·तिष्ठतु·तावत·मुहूर्त्तं॥चारुदत्तः इत्तिशेषः॥प्रक्रांतं वा॥हिती·॥किंनि ॥१३३॥

मित्तं ॥ प्रश्न॰ अरे भणितोऽस्मि पित्रा स्वर्गं गच्छता ॥ म्रियमाणेन पित्रा मरणसमये मह्यं कथितं इ-
त्यर्थः ॥ तदेवाह उज्झाधेत्यादिना ॥ यथा पुत्र वीरक यदि तव वध्यपाली भवति मा सहसन्ति ॥ सह-
सैवेत्यर्थः ॥ व्यापादयसि वध्यं ॥ हितो॰ अरे किं निमित्तं ॥ प्रश्न॰ कदापि कोपि साधुः र्थं दत्वा वध्यं
मोचयति ॥ कदापि राज्ञः पुत्रो भवति तेन ॥ बधावेन ॥ बद्धावेनेति देशी ॥ केवलं भाषा ॥ वृद्धिमहो-
त्सवेनेत्यर्थः ॥ महोत्सववृद्ध्या इति यावत् ॥ सर्ववध्यानां मोक्षो भवति ॥ कदाऽपि हस्ती बंधं खंड-
यति ॥ बधं खंडुयति इ पाठः क्वचित् ॥ बंधं ॥ छिन्नत्तीत्यर्थः ॥ तेन संभ्रमेण वध्यो मुक्तो भवति ॥ क-
दापि राजपरिवर्त्तो भवति तेन सर्ववध्यानां मोक्षो भवति ॥ शका॰ किं किं राजपरिवर्त्तो भवति

॥मृ॰टी॰१॰अं॰॥ राज्ञः परिवर्त्तः परिवर्त्तेनं अन्यो राज्ञेत्यर्थः ॥ चां॰ अरे॰ वध्यपालिकायाः ऽरेरवं कुर्मः ॥ ऽरेरवं क्रियते ऽस्यः
॥१३४ पालिकास्तव मम च क्रियते ऽस्य आमन्नावाभ्यामुपभुक्ताः वा काः काः इत्येवं गणन रूपं लिखितदर्श
१३५ न रूपं च व्यवहारमित्यर्थः पूर्वमिह च योध्यः ॥ श॰ अरे॰ शीघ्रं मारयत चारुदत्तकं ॥ चांडा॰ ॥ आर्यचा
रुदत्तं राजनियोगः ॥ खलु अपराध्यति न खलु वयं चांडालाः ॥ ततः स्मरयत स्मर्त्तव्यं ॥ प्रभवतीं
ति ॥ प्रबलानां ॥ न्यायाधीशानां अधिकरणिकादीनां पुरुषाणां वा को दूषितस्या ऽद्य मे भाग्य
दोषात् ॥ विदूषककक्षात् सुवर्णालंकारनिपातरूपात् दूषितस्येत्यन्वयः ॥ स्वर्गस्था भूमिस्थिता ॥राम॥
वा सैव ॥ वसंतसेनैव ॥ इमं कलंकं दूरीकरोतु ॥ ३४ ॥ चां॰ अरे॰ एतत् दृश्यते दक्षिणश्मशानं ॥ य ॥१३४॥

तं प्रेक्ष्य वध्या झटिति प्राणान् मुंचंति पश्य ॥ अर्द्धेत्यार्याछंदः ॥ अर्द्धकलेवरः प्रतिवृत्तं कर्ष
ति दीर्घगोमायवः ॥ अर्द्धे अपि शूललग्नं वेशं इव अट्टहासस्य ॥ ३५ ॥ प्रतिवृत्तं अर्द्धं कलेवरं द्
त्यर्थः ॥ गोमायुः ॥ शृगालः ॥ वेशमिवेत्यादेर्हास्याऽऽस्पदमित्यर्थः ॥ शकारः न तावत् गमिष्यामि ॥
चारुदत्तकं व्यापाद्यमानं तावत् पश्यामि ॥ कथं उपविष्टः ॥ चांडा॰ ॥ चारुदत्त किं भीतोऽसि ॥
चांडा॰ आर्यचारुदत्त गगनतले प्रतिवसंतः ॥ चंद्रसूर्यौ विपत्तिं लभेते ॥ किं पुनर्जनाः मर
णभीरुकाः मानवाः वा लोके ॥ कोपि उत्थितः पतति कोपि पतितोपि उत्तिष्ठते ॥ उत्थितः प
तने च वसनपातिका शवस्य पुनरस्ति वसनपातिका ॥ वस्त्रपतनं ॥ वस्त्रं प्रसारितं यथा निपत्त

॥मृ·प·२ अं॰॥ तिपुनरुत्पत्तिंचतथाशवोपिजीवतिकदाचित्त॥किंपुनर्जीवन्मनुष्यःपतितःपुनस्तिष्ठते
॥१३५॥ इतिवाच्यमितिभावः॥एतानि·हृदयेकृत्वा·संसंधारय·आत्मानं॥एततत्·चतुर्थघोषणास्थानं·
135 ततः·उद्घोषामः॥वसंतसेनाभिक्षुश्चोभौ·तौ·पूर्वोक्तौ॥भिक्षुः·हीमाणहे·आश्चर्यं॥अस्थानपरित्रा
तो·समाश्वास्य·वसंतसेनिकां·नयनु·अनुगृहीतोऽस्मि·प्रव्रज्यया॥सन्यासेनेत्यर्थः॥प्रव्रज्या
संन्यासः॥उपासिके·कुत्र·त्वां·नेष्यामि॥वसं॥आर्यचारुदत्तस्यैवगेहं॥तस्यदर्शनेन·मृगत्वा
छन्नस्यइवकुमुदिनीआनंदय·मां॥भिक्षुः॥कतरेण·मार्गेणप्रविशामि॥राजमार्गेण·एव·प्र ॥राम॰॥
विशामि॥उपासिके·एहि·इमं·राजमार्गं॥किंनु·खलु·एष·राजमार्गे·महान्·कलकलःश्रूयते ॥१३५॥

वसं॰ । कथं पुरतो महाजनसमूहः ॥ आर्य जानीहि तावत् किं न्विदं इति ॥ विषमभरक्रांता इ
व वसुंधरा एकपार्श्वोन्नता उज्जयिनी वर्त्तत इति ॥ चांडा॰ ॥ इदं च पश्चिमं घोषणास्थानं तत् ताड
यत डिंडिमं उद्घोषयत घोषणां ॥ भो चारुदत्त प्रतिपालय ॥ क्षमस्वेत्यर्थः मा बिभेहि लघु ॥ शी
घ्रं ॥ एव मार्य से ॥ भिक्षुः ॥ श्रुत्वेति ॥ घोषणां श्रुत्वेत्यर्थः ॥ उपासिके त्वं किल चारुदत्तेन मारि
ताऽसीति चारुदत्तो मारयितुं नीयते ॥ वसं॰ हद्धी ॥ ॥ भयेवोशा ॥ कथं मम मंदभागिन्याः कृ
ते आर्यचारुदत्तो व्यापाद्यते ॥ भो त्वरित्तं ॥ ॥ आदिश मार्गं ॥ भिक्षुः ॥ त्वरतां २ बुद्धोपासिका आर्य
चारुदत्तं ॥ जीवंतं समाश्वस्तुं ॥ आर्याः अंतरमंतरं ददत ॥ वसं॰ अंतरमंतरं ॥ चंडा॰ ॥ आर्यचारु

 दत्त॰स्वामिनियोगः अपराध्यति॰ तत॰स्मर॰यत॰स्मर्त्तव्यं॥ चंडा॰ आर्यचारुदत्त उत्तानो भूत्वा॥
 समं॰तिष्ठ एकप्रहारेण॰मारयित्वा॰त्वां॰स्वर्गं नयामः॥ चांडा॰ ही॥ विस्मये कथं आ अद्दि दे॥

इत्यार्याछंदः॥ आकृष्टः सरोषं मुष्टौ मुष्टिना॰गृहीतोऽपि॥ धरण्यां॰किमर्थं॰पतितः दारुणाकः अश
निसंनिभः॥ खड्गः॥ ३४॥ यथा एतत॰संवृत्तं॰तथा॰तर्कयामि॰न॰विपद्यते आर्यचारुदत्तः इति॥ भग॥
वति॰सह्यवासिनि॥ प्रसीद॥ सह्यः पर्वतः तत्रवर्त्तमानां दुर्गां देवीं प्रार्थयते॥ प्रार्थनामेवाह॥ अ
वि॰णामेत्यादिना॥ अपिनाम॰चारुदत्तस्य॰मोक्षो॰भवेत॥ तदा अनुगृहीतं॰त्वया॰चांडालकुलंभ 
वेत॥ अपरः॥ यथाऽऽज्ञप्त॰मनुतिष्ठाव॥ प्रथम॥ भवतु॰एवं॰कुर्वः॥ प्रभवतीति पद्यऽमंतकाले स्मर 

णरूपंइतितदेवपुनः२पठतीतिध्येयं॥भिक्षुः॥वसं॰आर्याःमातावत्॥आर्याःएषा·अहं·मंदभा
गिनी·यस्याःकारणात्·एषव्यापाद्यते॥चांडा॰॥तुलितंइत्यार्याछंदः॥लपितं·कास्मुन·रेषा·अंसपत॰
ता·चिकुरभारेण॥मामेतिव्याहरंती उत्थितहस्ता·इतः एति॥२४॥वसं॰ आर्ये·चारुदत्त·किंनेदं इति
भिक्षुः॥आर्यचारुदत्त·किंनेदं॥चांडा॰कथं·वसंतसेना·ननु·खलु२ अस्माभिः॥साधुर्ने·व्यापादितः
भि॰अरे·जीवति·चारुदत्त॥चा॰॥जीवति·वत्सरथतं॥वसं॰॥प्रत्युज्जीविताऽस्मि॥निर्गतजीव
स्यपुनर्जीवनंप्रत्युज्जीवनं॥गतजीवितापुनरागतजीविताऽस्मीत्यर्थः॥अत्रजीवस्थानीयः
चारुदत्तः॥एवेत्यवधेयं॥चांडा॰॥तत्·यावत्·एतं·वृत्तांतं·राज्ञः॥यज्ञवाटगतस्यनिवेदयावः॥

॥मृ॰टी॰१॰अं॰७॥ शका॰ ही॰ मा दिके॥ खेदे॰॥ केन गर्भदासी॥ जीवाविदा॥ जीवदवस्थां प्रापितेत्यर्थः॥ उत्क्रांता॰ मे प्रा
॥१३७॥ णाः॥ भवतु प्रत्यायिष्ये॥ चां॰ उपसृत्येति॥ द्वितीयचांडालस्य समीपं गत्वेत्यर्थः॥ अरे॰ ननु अस्मा
137 कं ईदृशी राज्ञाऽऽज्ञप्तिः येन सा व्यापादिता ते मारयत तत् राष्ट्रियश्याल मेव अन्वेषयावः
केयमिति॥ अनुष्टुप्॥ ३६॥ वसंतसेनेति॥ स्पष्टं॥ ३७॥ किंनु इति॥ श्लोकः॥ जीवातोः जीवनौषध
स्य॥ काम्यया॥ इच्छया॥ जीवातुर्जीवनौषधं इत्यमरः॥ काम्या॥ इच्छा तस्याः वसंतसेनायाः॥
रूपस्य आनुरूपेण सादृश्येन विशिष्टेत्यर्थः॥ विशेषणे तृतीया॥ ३८॥ वसं॰ आर्यचारुदत्त॰। ॥राम॰॥
सा॰ एवाऽहं पापा॥ यस्याः कारणात् इयं त्वया असदृशी अवस्था प्राप्ता॥ आश्चर्यं २ जीवति ॥१३७॥

वसंतसेना॥ वसं०॥ सेवाऽहं मंदभागा॥ कुतः इत्यनुष्टुप् छंदः॥ विद्याऽमृतसंजीवनी बोध्या॥ इ
र्थ॥ त्वदर्थमिति॥ एतत् देहमिति कायो देहः॥ क्लीबपुंसोरित्यमरः पुनर्ध्रियेत पुनर्जीवेदि
त्यर्थः॥ छे०॥ रक्तं इति॥ अत्र वाच्यार्थः स्पष्टः॥ व्यंग्यार्थस्तु तावदेतावतीमिमां मापदमुपभुञ्ज्या
पि यदि तवाऽहं दरिद्रतया न दयितस्तदाऽनर्थः इति इति॥ विवाह इवेति किं वाच्यं तव च
मम चाऽयं विवाहः एवासीदितः परं कदापि मामाऽमत्याक्षीरिति चाऽवसेयः॥ छे०॥ वसं०॥
अतिदक्षिणतया किं नेदं व्यवसितं आर्येण॥ दक्षिणता उदारता समर्थता वा॥ किं नेदं
मित्यानुपूर्वी वितर्के इत्यसकृदुक्तं॥ पूर्वेति॥ श्लोकः॥ शत्रुणा॥ शाकारेण॥ प्रभविष्णुना॥ राज्ञा

॥मृ·टी·९अं·॥ श्यालत्तया प्रभुणेत्यर्थः ॥ यत्तोमुक्तोऽहो मनागिति ॥ ६४ ॥ वसं· ॥ शांतं पापं प्रतिहतं ऽमममंगलं ॥
॥१३८॥ तौं ते स्मि· राजश्यालेन· व्यापादिता ॥ वसं· तेन अनार्येण· व्यापादिता ॥ एतेन आर्येण· जीवं प्रा
पिता ॥ अस्मि ॥ भिक्षुः ॥ न· प्रत्यभिजानाति· मां आर्यः ॥ अहं· सः ॥ आर्यस्य· चरणसंवाहचिंतया·
संवाहको· द्यूतकरैः· गृहीतः ॥ एतयाउपासिकया ॥ अज्जस्सा· केलके त्ति ॥ आर्यस्य आत्मीयः
इति· अलंकारपणानिष्क्रीतोऽस्मि ॥ तेन च द्यूतनिर्वेदेन· शाक्यश्रमणकः· संवृत्तोऽस्मि· एषा
ऽपि आर्या· प्रवहणविपर्यासेन· पुष्पकरंडकजीर्णोद्यानं· गता· तेन· च· अनार्येण· न· मां· ब· ॥राम·॥
हु· मन्यसे इति· बाहुपाशबलात्कारेण· मारिता ॥ मया· दृष्टा ॥ जायतीति ॥ वृषभकेतुः· शिवः ॥ ॥१३८॥

हंता· भेत्ता· क्रौंचशत्रुरिति प्रभूतप्रभावाभिप्रायं॥ आर्येक· पूर्वोक्तः सिद्धाऽऽदिष्टराज्यलाभवान्यः
सः॥ स्तुमः के वासवखड्गां गां पृथिवीं कृत्स्नां संपूर्णां जयति स्वायत्तीकरोतीत्यर्थः॥ ६३॥ विनिहत
वरवैरीति यदुक्तं तदाह॥ हत्वेति॥ स्पष्टं शेषभूतां चरमां इत्यनेन सर्वकर्त्तव्यमन्यत्कृतमि
ति ध्वनिः॥ ६४॥ हत्वा रिपुमिति॥ बलं सैन्यं मंत्रश्च आभ्यां हीनं॥ प्रकर्षात् स्वकीयप्रतापादेः॥
प्रभावात्॥ नगरस्थान॥ कुतोपि यूयं माभैष्टेति विश्वासमुत्पाद्येत्यर्थः॥ वसुधायाः आधिराज्यं
स्वाम्यं यस्मिन्नी दृशं संपूर्णं शत्रुराज्यं शत्रोः पालकस्य राज्ञः राज्यं॥ अखेदाऽऽज्ञाविषयोहिरा
ज्यमिति लक्षणालक्षितं राज्यमित्यर्थः॥ प्राप्तं॥ किमिव शत्रुराज्यं॥ वृत्रारेः इंद्रस्य राज्यमिव॥

॥मृ॰टी॰ १०अं॰ ऐंद्रं पदमिवेत्यर्थः॥ अयमुपमानवाक्यार्थः उपमेयेरिपुराज्यविशेषणमितिज्ञेयमड्गं॥ ४५॥ यत्राऽयं

॥१३८॥ जनपदेति लक्षणया जनपदवृत्तिजनपरं तेषां जनानां समवायः॥ समूहः॥ अत्र॥ तेन॥ चारुदत्तेनेत्यर्थः॥

139 भवतु इति अंतरसंवादे इत्युक्तं॥ अयमारंभः॥ राज्ञः पालकस्य हननरूपः॥ उद्योगः॥ अपिनाम सफलः स्यादि

ति संभावना॥ जाल्मोऽसमीक्ष्यकारी स्यात्॥ अविचार्यकारिणः जाल्माः यूयं॥ अपयात दूरं गच्छतेत्यर्थः॥ ध्रि

यते॥ जीवति॥ अस्मत्स्वामिनः॥ आर्यकस्य नूतनमहाराजस्येत्यर्थः॥ दिष्ट्या भो इति॥ प्रहर्षिणीछंदः॥ दुः

खसमुद्रात् दुर्धराद् उत्तीर्णो॥ केनोपायेनउत्तीर्णः तत्राह॥ नावेव प्रियतमयेति॥ वसंतसेनयेत्यर्थः॥ सुगुणः ॥राम॥

रज्जुः॥ लोकप्रसिद्धोनुरागादिः॥ उपरागः ग्रहणं॥ ४६॥ आर्यवं ऋजुत्वं॥ सरलेता साचेयं सविनया ॥१३८॥

स्वच्छेत्यादिना नारूपावोध्या ॥ शर्विलकः येनेति ॥ श्लोकः ॥ न्यासः ॥ यः संन्यस्तः सेनादत्त्ता सुवर्णभाण्डरूपः तस्य अपह
रणं ॥ स्वर्णस्तेयस्य शास्त्रोक्तमहापातकत्वादाह कृतमहापापमिति ॥ ४७ ॥ शर्विलकः भूतपूर्वं वृत्तान्तमुक्त्वा साम्प्र
तवृत्तान्तमाह ॥ अन्यच्चेत्यादिना ॥ आर्यकेणेति ॥ श्लोकः ॥ यज्ञवाटः यज्ञस्थानं ॥ इदं चाऽपरिच्छिन्नजनसंमर्दे
नः प्रमादस्थाने तत्र च शस्त्राघातहननादेः ॥ संभावनापि नेत्याशयेनाऽऽह यज्ञवाटस्थ इति ॥ पालकः राजा
पशुवत् हतः इत्यन्वयः ॥ ४८ ॥ शर्विलकः एवमुक्तेऽपि न सम्बुद्धं चारुदत्तेनेति पुनः स्पष्टयति ॥ लब्ध्वानेइ
ति ॥ श्लोकः ॥ तव चारुदत्तस्य यानं प्रवहणं रथं ॥ यः आर्यकः त्वां ॥ चारुदत्तं ॥ तेन ॥ आर्यकेण पालकः पशुवत् ॥ एम ॥
हतः इत्यन्वयः ॥ ४९ ॥ घोषात् आभीरग्रामात् ॥ निष्कारणं ॥ निरपराधं इत्यर्थः ॥ अन्यथा सिद्धादेशस्य अयमा

॥ मृ॰टी॰१०अं॰॥ र्यकः॥ श्रीमानाज्ञा भविष्यतीत्याकारस्यकारागारबंधनकारणस्य सत्वात्॥ कूटागारे॥ बंधनगृहे॥ त्वया॥ श

॥१६०॥ र्विलकेन॥ मोचितः॥ निगडंबंधनं रक्षा च भित्वा मोचितः॥ तत्र भवानित्येकंपदं॥ पूज्यः इत्यर्थः॥ राज्यं अत्ति

160 सृष्टं॥ दत्तं॥ अतिसर्गो दाने॥ द्विजेभ्यः संकल्प्य दत्तं इत्यर्थः॥ युष्मद्गुणोपार्जितं॥ युष्माकं॥ पूज्यानां शिष्ट

तया सिद्धानामिव चारुदत्तशर्विलकादीनां गुणाः उपकाराः प्रवहणावतरणबंधनभेदनसिद्धादेश

नादयः॥ तैरुपार्जितं॥ राज्यं यतः॥ तत्र ततः॥ उपयुज्यतां॥ उपयोगविषयीक्रियतां॥ चारुदत्तचंदनश

र्विलकादिभिः॥ सर्वैर्युपयोगः सार्थकता राज्यस्य यथा भवति तथानुष्ठीयतामित्यर्थः॥ शकार॥ हीमादिके ॥राम॰॥

विदेः व्ययं॥ एवं हृतमितिश्लोकः॥ एवं दूरमतिक्रांतः उद्दामः इव गर्दभः॥ आनीतः खलहं बद्धः॥ हृदे॥ स्वा कु ॥१६०॥

कुरः॥ अप्पो॥ अन्यः। वा इव। दुष्करो। दुष्करः। दुर्धरः इत्यर्थः॥ ५०॥ समेततः उपस्थितः स राष्ट्रियवंधः॥ ततः कि
मिदानीमशरणः शरणं प्रव्रजामि॥ भवतु॥ तमेव अभ्युपपन्नशरणरक्षणं गच्छामि॥ स०॥ आर्यचारुद
त्त परित्रायस्व॥ आर्यचारुदत्तः मुंच रे व्यापादयामः एतं॥ श०॥ भो अशरणशरण परित्रायस्व॥ किमस्ये
त्यादिवाक्येन पृष्टं विकत्थयति आकर्षत्विति॥ श्लोकः॥ एनं॥ शकारं॥ सुवध्यं॥ सुष्टु वध्यापादे रज्जुं चांडा
लाः आकर्षन्तु॥ श्वभिः॥ कुक्कुरैः॥ क्रकचेन॥ आरावयेन शस्त्रेण विदारयतां वा॥ ५१॥ श०॥ भट्टारक चारुदत्त शर
णागतोऽस्मि॥ ततः परित्रायस्व॥ यत् तव सदृशं ततः कुरु पुनर्नईदृशं करिष्यामि॥ व्यापादयत किं नि०
मित्तं पातकी जीव्यते॥ शका०॥ गर्भदासीपुत्रि प्रसीद न पुनः मारयिष्यामि॥ ततः परित्रायस्व॥ शत्रुरि०

147

त्यार्याछंदः उपकारेत्यादिः चतुर्थः चरणः॥ पूः॥ शाका॰॥ हामादिके॥ प्रत्युक्ती॥ वित्तोऽस्मि॥ यस्तु सत्कं दृष्टु
ऽस्माभिरियं कृता व्याख्या तत्र हि शतवर्षेज्जीर्णे पुस्तके दृश्यते इतः परं नीलकंठेनाऽपूरि॥ इति प्रति॰
य॥ नेपथ्ये कलकलः पुनर्नेपथ्ये एषा अज्ञा चालुदत्तस्स बहुआ अज्जा धूदा इत्यारभ्य अग्रे॥ शर्वि
दिष्ठाजीवितसुहृद्वर्गः आर्यः॥ चारु॰॥ युष्मत्प्रसादेन॥ इत्यंतं समाप्य॥ यत्सूर्योदयमयतः कविनो
चितपात्रमेव नंन कृतं॥ सुंदरयुक्तिभिऽररचयऽऽदा चंदनकोक्तिनीलकंठस्ततः॥ ५॥ इति निजानि॰
मिर्तिसूचिकामार्योविरच्य समापितोऽयमधिको ग्रंथः॥ पुस्तकांतरे तु नदरीदृश्यतेऽस्माभिस्तु मूल ॥राम॥
कल्कविताऽननुरूपामपीमां कवितामालोच्यापि ग्रंथोयं प्रकृतग्रंथसंलग्नः इवेति व्याख्यायते इत्य ॥१६४॥

वधेयं॥ एषा आर्यचारुदत्तस्य वधू: रार्या धूता पदे वसनांचले विलगतं दारकमाक्षिपंती॥ बाष्पभरि
तनयनैः जनैर्निवार्यमाणा प्रज्वलिते पावके प्रविशति॥ चंदः॥ किंन पश्यति आर्यो महाराजप्र
सादं दक्षिणेन महान् जनसंमर्दो वर्त्तते तत्र॥ एसेत्यादि अनुपदोक्तं ज्ञेयं॥ महाराजः पालकः॥ कथि
तं च मया तस्यै यथा आर्ये मा सहसं कुरुष्व जीवति आर्यचारुदत्तः इति॥ परं तु दुःखव्यापृततया
कः शृणोति कः प्रत्ययते॥ न महीतलेति॥ हे चारुचरिते यदपि यद्यपि भवत्याः चरितानि पातिः
व्रत्यसुशीलतादिलक्षणानि॥ महीतलस्थितिसहानि॥ न संति॥ भूतले स्थातुं न शक्नुवंतीत्यर्थः॥
पदार्थऽमत्युर्यं न धर्त्तुं समर्था भूरिति भावः॥ तथापि स्वर्गसुखं मया विना न त्वया भोक्तुं युक्तं पतिव्र

॥मृ·टी·१०अं॥ तात्वादिति सर्वार्थः॥ वसं· समाश्वसितु·आर्यः॥ तत्र गत्वा·जीवयतु आर्या·अन्यथा·अधीरत्वेन·अन
॥१४२॥ र्थः संभाव्यते॥ चंद·इत्तः२ आर्यः धूता॥ तात मुंच·मां मा·विघ्नं·कुरुष्व·बिभेमि·आर्यपुत्रस्य·अमंगला
ऽऽकर्णनात्॥ रोहसेनः॥ हा आर्ये प्रतिपालय·मां·त्वया·विना·न शक्नोमि·जीवितं·धर्तुं॥ विदू॰॥ भव
ती·मा·तावत्॥ ब्राह्मण्याः भिन्नत्वेन·चिताधिरोहणं·पापमुदाहरंतिऋषयः॥ क्षत्रियादीनां भि
न्नत्वेनापि चितारोहणाधिकारस्मरणादुक्तं ब्राह्मण्याः इति·भिन्नत्वेनेति च॥ धूता॥ वरं·पापा
चरणं·न·पुन·रार्यपुत्रस्य·अमंगलाऽऽकर्णनं॥ धू॰। रदनिके अवलंबस्व·दारकं·याव·दहं·समी ॥राम॰॥
हितं·करोमि॥ चेटी॰॥ अहमपि यथोपदेशिनी अस्मि·भट्टिन्याः॥ धूता॥ आर्यः तावत् अवलंब ॥१४२॥

तां॥ विदू॰॥ समीहितसिद्धौ प्रवृत्तेन॥ ब्राह्मणः अग्रतः कर्त्तव्यः अतो भवत्याः अहं अग्रणीः भवा
मि॥ धूता॥ कथं प्रत्यादिष्टाऽस्मि द्वाभ्यां॥ तातत्वमेव॥ पज्जवत्ठावेहि॥ पर्यवस्थापय॥ आत्मानं अ
स्माकं तिलोदकदानाय॥ अतिक्रान्ते किं मनोरथे॥ न खलु आर्यपुत्रः त्वां पर्यवस्थापयिष्यति॥
धूता॥ आश्चर्यं आर्यपुत्रस्येव स्वरसंयोगः॥ दिष्ट्या आर्यपुत्रः एव एषः॥ प्रियं मे॥ बालकः॥ अश्च
र्यं पिता मां परिष्वजति॥ आर्ये वर्द्धसे जनकः एव मां पर्यवस्थापयति॥ हा प्रेयसीति प्रथमे सं
बोधने द्वितीयं सप्तम्यं तं॥ लोचनमुद्रणामिति मुकुलीभावं लक्षयति॥ ०॥ धूता॥ आर्यपुत्र अ
तः एव सा अचेतनेति चुम्ब्यते॥ विदू॰॥ आश्चर्यं एताभ्यामेवाऽक्षिभ्यां प्रियवयस्यः प्रेक्ष्यते अ

॥मृ॰टी॰१॰अं॰॥ हो॰ सत्याः प्रभावो यतो ज्वलनप्रवेशव्यवसायेन एव प्रियसमागमं प्रापिता॥ जयतु २ प्रियवयस्य॰
॥१४३॥ 143 चेटी॥ अहो संविधानं॥ समीचीनं विधानं॰ घटनमनयोर्दंपत्योरित्यहो आश्चर्यमित्यर्थः॥ अन्यथाऽ
नयोर्द्वयोरपि नाशसमवधानस्यस्य संभवादिति भावः॥ आर्य वंदे॥ धूता॥ दिष्ट्या कुशलिनी भगि
नी॥ वसं॰॥ अधुना कुशलिनी संवृत्ताऽस्मि॥ दिष्ट्या दैवेन जीवितः सुहृदां आर्यक वसंतसेना धूता
दीनां मित्राणां वर्गः॥ समूहः यस्य तादृशः आर्यः दिष्ट्या दैवेन न त्वन्येन केनापि कारणेनेत्यर्थः॥
नाहं दैवेन जीवितसुहृद्वर्गः किंतु युष्मत्प्रसादेनेत्युत्तरं ददौ चारुदत्तः॥ एतावत्पर्यंतमेवाऽय ॥रामः॥
मधिकोऽयग्रंथः॥ पुस्तकांतरे तु॥ शका॰॥ हीमादिके पच्चुज्जीविदेह्मि इति पुरुषैः सह निष्क्रांतः इत्यन्तं ॥१४३॥

तरं॥ शर्वि०॥ आर्येवसंतसेने परितुष्टो राजा भवतीं वधूशब्देनाऽनुगृह्णाति॥ राजा॥ आर्यकः॥ इत्ये
वद्दृश्यते ग्रंथः एवंधपूर्वापरीभावमावहन्॥ नलब्धोऽयमधिकः क्वचिदिमइतीदमिहावधेयं॥
वसं०॥ आर्य कृतार्थाऽस्मि॥ वसंतसेनाऽमवगुंठ्येति॥ प्रावारकेणवसंतसेनाऽऽमाच्छाद्येत्यर्थः॥ नि
र्मोकमिववेश्यात्वंव्यवच्छिद्य वर्णांतरेण व वधूपदाभिधेयत्वेन वसंतसेनाभुजंगीऽमस्वचका
रेति भावः॥ अस्याभिक्षोः॥ प्रागुक्तस्य संवाहकनाम्नो भिक्षुभूतस्येत्यर्थः॥ भिक्षुः॥ इदं इदृशं॥
अशरणत्वं॥ अनित्यत्वं॥ प्रेक्ष्य द्विगुणतरो मम प्रव्रज्यायाः बहुमानः संवृत्तः॥ इदं ईदृशं अ
नित्यत्वं॥ क्व राजा पालकः शकारः॥ तत्कृतो वसंतसेनाचारुदत्तोदंदोनां वधः॥ क्व चायमार्जकः आभी

॥मृ॰टी॰२४॥ [illegible]णादेव॰भूमिदेवः श्रीमहाराजस्यैवंविधं इत्यर्थः॥ अस्य॰भिक्षोः निश्चयः॥ निखिलं जगदिदम

॥१५५॥ नित्यमिति वैराग्यलक्षणो निर्णयः॥ सर्वविहारेषु॥ सौगतदेवालयेषु॥ विहारोनास्तिकाऽऽलये

155 इति कोशः॥ कुलपतिः॥ अध्यक्षः सर्वस्वामीत्यर्थः॥ कुलं॰गृहं॥ वसं॰सांप्रतं॥ जीवनसाफल्यं प्रा

पिताऽस्मीत्यर्थः॥ दशभिः सुवर्णैर्मोचितेनं निष्क्रीतेनैव संवाहकेन निर्वेदात् भिक्षूभूतेन वसं

तसेना॰सलिलसेचनादिना जीवदवस्थां प्रापितेति महानुपकारः॥ आसीदिदानीं सकलवि

हारकुलपतित्वाधिकारवितरणेन प्रत्युपकारप्रतीकारः॥ आसीदिति संपदं॰जीवाविद्यो ॥राम॰॥

त्यस्याऽऽशयः॥ सुवृत्तः॥ सदाचारोयं॥ अदासोभवतु॥ इतः परं कस्यापि दास्यं नानुभवत्वित्यर्थः ॥१५५॥

पृथिवीदंडपालता॥ पृथिव्यां पृथिव्याः वा यो दंडः शासनं तं पालयतीति पृथिवीदंडपालः॥
तस्य भावः॥ सर्वपृथिव्यां कोष्ठपालाधिकारो भवतीत्यर्थः॥ दंडपालः एव ग्रामकूटकः इति ना
गरिक इति चाभिधीयते॥ स्फुटं चेदं दशकुमारादौ॥ तस्येत्यादि॥ तस्य राज्ञः श्यालस्य शकार
स्य पूर्वं॥ तडिगिनीपतेः पालकस्य राज्ञो राज्येऽभूत् इत्यर्थः॥ यथैव वर्त्तमाना क्रिया तथैवास्तु इ
त्यन्वयः॥ क्रिया॥ दानाऽऽदानसंमानस्नानवसनभोजनाऽऽगनाद्यैश्वर्योपभोगलक्षणः स
र्वव्यापार इत्यर्थः॥ सज्जनशिरोमणिना चारुदत्तेनाऽतिथ्यौंडीर्यादेव मम्मिहिहितेपि शर्वि
लकेन पूर्वं यथैव वर्त्तमाना क्रियेत्यादेर्मारणरूपा क्रिया वृद्धेति तथैवाऽश्येन परमोत्सा

॥ मृ॰टी॰ २७अं॰ ॥ हे न शर्विलकः प्राह पश्येनमिति ॥ एनं शकारं मुंच मुंच ॥ एनं अहं व्यापादयामि स्वयं मारया
॥ १६५ ॥ मिति पश्य त्वं इति कथनेन समुन्नीयते परमोत्साहः ॥ शत्रुः कृतापराधः शरणमुपेत्य पाद
योः पतितः ॥ शस्त्रेण न हंतव्यः उपकारहतस्तु कर्त्तव्यः इत्यार्या स्मर्त्तव्याऽनुपदमेवोक्ता ॥
आशीराशिशंसनलक्षणां ग्रंथसमाप्तिं ग्रंथकारस्तावदवतारयति तदुच्यतां किं ते भूयः
प्रियं करोमीति ॥ ते चारुदत्तस्य ॥ एकवारं त्विदमनेकधा प्रियं कृतं ते भूयः पुनः किं करोमि ॥
प्रियमिति प्रश्नेन वीररसस्थायिभावस्य परमोत्साहस्य परमाविर्भावः प्रतीतिपथमव ॥ राम॰ ॥
तरतीति साक्षिणः सहृदयाः ॥ स्वीयभाग्य प्रियवयस्य प्रतापप्रभावसंपादितां प्रियपरं ॥ १६५ ॥

परां चारुदत्तः प्राह लब्ध्वेति ॥ मगधराष्ट्रेंद्रः ॥ चरित्रमेव चारित्र्यं ॥ स्वार्थे ष्यञ् ॥ वसंतसेनामारणा
पवादादिरूपस्य चारित्र्यस्य शुद्धिरित्यर्थः ॥ एष ॥ राज्ञः श्यालः शकारः संस्थानकनामकः ॥ श
त्रुरपि मामिदानीमेव शातयन् घातयन्नपि मुक्तः कृतः ॥ यतः ॥ चरणयोर्निपतितः अतः मु
क्तः इत्यर्थः ॥ प्रोत्खातं अरातीनां शत्रूणां ॥ मूलं येन स तथा ॥ एतेनाऽरातिवंशांऽकुरप्ररूढ
यारंभगंधोप्यपास्तः ॥ अस्मदादीनां प्रियसुहृत् आर्यकः ॥ आभारः पूर्वोक्तः ॥ राजा ॥ भूत्वेति शे
षः ॥ अचलां भूमिं शास्ति ॥ दुष्टनिग्रहसहितः शिष्टानुग्रहः शासनं ॥ प्रिये सुहृदि मित्रे मयि
चारुदत्ते ॥ इयं प्रिया वसंतसेना ॥ भूयः पुनः ॥ प्राप्ता ॥ संगतेत्यर्थः ॥ भवान् शर्विलकः ॥ मे मम च

॥मू·टी·१०अं॥ यस्य॥संगतः॥मिलितः॥अपूर्वेवाभवदितिभावः॥तुर्यः पादः स्पष्टः॥भवंतं॥अविलंबं॥१०॥सक
॥१६८॥ लग्रंथार्थनिगमयंऽन्नप्रस्तुतप्रशंसालंकारेणप्राहकाँश्चिदिति॥तुच्छयति॥तुच्छान्करोति
146 अन्योन्यं प्रतिपक्षाणां बाध्यबाधकानां विरुद्धानामित्यर्थः॥धनित्वनिर्धनत्वराजत्वरंक
त्वादीनां संहतिः समूहो यस्यां ईदृशीं॥संहतिरूपां इति वा॥लोकस्थितिं॥लोकव्यवहारं॥
उत्पत्तिस्थितिप्रलयाः इति क्रमात्॥विधिः दैवं॥कूपे यंत्रं घटीयंत्रं तत्र घटिकाः स्वल्पाः घट
टाः॥तासां न्याये प्रसक्तः॥घटीयंत्रे चलति सति॥घटिकास्तु मालायां क्रमादुच्चनीचभावे जलमा ॥राम०॥
नयंति त्यजंति यथा॥तथा विधिरपि स्वक्रमायातमधनत्वसधनत्वादिकमनुभावयतीत्य ॥१६८॥

र्थः ॥ ० ॥ आशीरात्मकं भरतवाक्यं क्षीरिरायः इति ॥ उक्तं छंदः ॥ क्षीरशीलाः ॥ ताच्छील्ये णिनिः ॥ गावः
संतु ॥ गवां संकीर्तनं शकुनरूपमिति ज्ञेयं ॥ तत्रापि हव्यकव्यक्रियानिदानक्षीरवत्त्वेन त्वंऽधि
कंबोध्यं ॥ भूः सर्वसंपन्नसस्यं यस्यां सा भवतु ॥ पर्जन्यः ॥ मेघः ॥ स्वसमयवर्षी भवतु ॥ अनिलाः ॥
कोमलाः वांतु गच्छंतु नतु रुंझावाताः ॥ जान्मिनः ॥ सदा ॥ मोदंतां ॥ अभिमताः ॥ द्विजाः ॥ संतः चान्ये
श्रीमंतः संतु ॥ शांतशत्रवो भूयासुः ॥ धर्मेनिष्ठा भक्तिर्येषां ताद्दृशाः भूत्वा ॥ पृथ्वीं पांतु इति प्र
कृतसर्वप्रबंधार्थसंवलिते यमाशीरिति शिवं ॥ जयश्च भगवति ॥ काव्यनाट्यरसज्ञाः ये भू
पाः ॥ तान् बुभुंक्षे कलिः ॥ अप्रचाराः दस्युज्ञानिपुस्तकानीत्यहं तुदं ॥ ३ ॥ मूलस्यैयं कथा ॥ कापि

॥मू॰टी॰श्लो॰॥ व्याख्यावार्त्तापि न श्रुता ॥ प्रेरणं तु प्रभोर्बुद्धेः सीयेति करणं द्वयं ॥ २ ॥ दिनाष्ट भावनालग्नम
॥१४७॥ लग्नं किंचिदक्षरं ॥ प्राकृतं तत्र नाद्याऽर्थव्याख्याकर्त्तुः श्रमो महान् ॥ ३ ॥ कृतश्रमैः स विज्ञेयः ॥
प्राकृते संस्कृते समैः ॥ बलिसेननरेंद्रेण विदुषा ज्ञायतां श्रमः ॥ ४ ॥ शास्त्रार्थार्णवकर्णधार
कविताकांतारकंठीरवश्रीमच्छंकरदीक्षितस्य तनयः ॥ श्रीलक्ष्मणः तत्सुतः वच्छादीक्षितपं
डितः सुकवितालंकारशास्त्रेष्वसन्नुयत्तर्कपुराणशब्दनिपुणः ख्यातः सकाश्यामपि ५ वि
ख्यातः ॥ चित्रकूटे रघुपतिवसतिः ॥ संनिधौ तस्य चास्ते ग्रामः ॥ श्रीदेवरक्षः पितृमुखवसतिः ॥राम॥
संकासिका यस्य धाम ॥ शास्त्रे काव्ये विधात्रा गुणिमनुजमणेर्वालसेनस्य राज्ञः प्रात्यै व ॥१४७॥

ह्येतिनाम्ना सुगममिह कृतं प्राकृताऽरराय मेतत् ॥ ६ ॥ प्रारब्धं काशिकायां मुनिमुनिवसुभू
१८॥७७॥ वत्सरे राजधान्यां प्राणाः पत्नी दिवं साऽगम दिह कलकत्ताभिधायां तदानीं ॥ सूर्ये
दिग्दंति सप्ताचल धरणि ॥ १८७८ मिते गोत्रवृत्त्यै गतेन श्रीलक्ष्मादीक्षितेनाऽद्भुतबुध
कविनाऽकारि मानोन्नतेन ॥ ७ ॥ श्रीरामचंद्रपंडितलड्डू पारव्यस्य या पौत्री दौहित्री भगवंत
श्रीरावस्य श्रीरमा द्वितीया स्त्री ॥ ८ ॥ जयतात्पतिव्रतानां तता पताकेव सा कांता ॥ वागाऽ
विषयगुणमहिमाऽयं ग्रंथोऽभूद्ययाऽगनया ॥ ९ ॥ सेहाऽऽगत्य कुमारमद्भुतविभाभाग्याद
दिनोद्भासितं श्रीकालीचरणं प्रसूय सुभगा लोकोत्तरं स्वर्ययौ ॥ तस्याः कांत उदारधीरनु

नाटकटीका

॥ मृ॰टी॰ श्र॰ अं॰ पमो विद्वान्कविः सुंदरः क्लिष्टस्तद्विरहेण हेतिनिहतो व्याख्यांव्यतानीदिमां ॥ ११ ॥ ऋग्वेदी बो

॥ १४८ ॥ धवकरः ॥ श्रीकंवीदुववहादुरः ॥ सम्राड्दीक्षितसंख्यावान्विख्यातो व्याकरोदिदं ॥ १४ ॥ राकेंदुकुं

द संकाशकीर्त्तिसंकाशिताऽखिलाः ॥ संतः परामृशंत्स्वेवमहांतस्तेयतो मताः ॥ १२ ॥ जायतिसु

राऽसुरकुंमुटश्रेणीमाणिक्यमंजरीपुंजैः ॥ नीराजिताऽंघ्रियुगलं मंजुलवदनं महः शौरां ॥

१३ ॥ इतिश्रीमृच्छकटिकप्रकरणव्याख्यायांसुवर्णालंकरणाख्यायांसंहारोनामदशमोंऽकः समाप्तिऽमभजातू ॥ संपूर्णोदेदं मृच्छकटिकप्रकरणविवरणंसुवर्णालंकरणंनाम ॥ ॥ राम ॥

॥ ❁ ॥ ❁ ॥ ॥ १ मितिभाद्रवसुक्ला २ ॥ ॥ सुभंभूयात ॥ ग्रंथसंपूर्णोम ॥ संवत् १८७८ ॥ ० ॥ ❁ ॥ १ ॥ ❁ ॥ ॥ १४८ ॥

148